संस्कृतिः

संस्कृतसङ्घस्य वार्षिकी पत्रिका



सर्वधारिसंवत्सरः

२००८-०९

संस्कृतभाषायां द्वितीया सञ्चिका - २००८
पूर्वसञ्चिकाः - १९७८, १९८५, १९९४, १९९५, २००७

एप्रिल् २००८ मासस्य १३ तमे दिनाङ्के लोकार्पिता

संस्कृतसङ्घस्य कार्यनिर्वाहकवर्गः

अध्यक्षः — प्राचार्यः वी. वी.एस्. शर्मा (गणनविज्ञानविभागः)

कार्यदर्शिनौ — एच्. एल्. प्रसादः (गणनविज्ञानविभागः)
कार्तिकरामन् (क्षिप्रतमगणकयन्त्रसंशोधनविभागः)

कोशाधिकारी — वै. कालिदासः (क्षिप्रतमगणकयन्त्रसंशोधनविभागः)

सम्पादकवर्गः

एच्. एल्. प्रसादः (गणनविज्ञानविभागः)

हरिपवनकुमारः (विद्युद्विभागः)

भै. विजयादित्यः (विद्युत्सम्पर्कविभागः)

आर्. एस्. उमेशः (विद्युद्विभागः)

शिवरामकृष्णः (विद्युत्सम्पर्कविभागः)

आमुखम्

भारतीयविज्ञानसंस्थायां स्थितोऽयं "संस्कृतसङ्घः" सर्वविज्ञानस्य मूलभूतायाः संस्कृतभाषायाः, भारतीयसंस्कृतेः, भारतीयविज्ञानस्य च प्रसाराय कृतलक्ष्यः वर्षे वर्षे, दिने दिने वृद्धिमधिगच्छन्नस्ति। सङ्घेनानेन तत्कृते चाल्यमाना वार्षिकी पत्रिकेयं "संस्कृतिः" बहोः कालात् प्रभृति बहूनां विदुषां, कवीनां लेखनीभ्यः निस्सृतानां विचारामृतधाराणां सारशेवधिर्भूत्वा संस्कृतभाषायाः तथा भारतीयसंस्कृतेः, भारतीयविज्ञानस्य च दर्शनं कारयति। वेदवेदान्तेतिहासशास्त्र-पुराणेषु, विविधकाव्येषु च निबिडीकृतान् विषयान् क्रोडीकृत्य अनेके ज्ञानिनः, पण्डिताः, रचयितारश्च अस्मिन् प्रसारे भागं गृह्णन्ति। अनेन च सङ्घेन १९७८, १९८५, १९९४, १९९५ वत्सरेषु समाजोपयोगिभिः, भारतीयसंस्कृतिसंबद्धैः विविधैः विषयैरुपबृंहिताः पत्रिकाः कल्पिताः।

भारतीयसंस्कृतेः महत्त्वं, विश्वजनीनभावनायुक्तत्वं, विशालभावनात्मकत्वं, सर्वदा अविस्मरणीयत्वं च बोधयितुं, ज्ञापयितुं, भविष्यत्सन्ततिं प्रति तत्सङ्क्रामयितुं च एताः पत्रिकाः बहूपकुर्वन्तीति निर्विवादोऽयमंशः। तदिमं कार्यक्रमं अनुस्यूततया विधातुं अस्मिन् २००७ वत्सरेऽपि अस्याः पत्रिकायाः सम्पादनं सङ्घेनानेन आरब्धम्। इतः पूर्वं संस्कृताङ्ग्लभाषयोः मिश्रणेन प्रचुरितैषा

पत्रिका २००७ वर्षादारभ्य केवलगैर्वाण्यामेव साक्षाद्भवन्नस्तीति विशेषोऽयमंशः। पूर्वस्मिन्नब्दे (२००७) प्राप्तसुहृज्जनप्रशंसेयं पत्रिका द्वितीयमुद्रणभाग्यभागजायत। अमुष्मिन्नपि वर्षे नूत्नद्युतिमती वैलक्षण्यवत्यसौ पत्रिका रसिकचेतःप्रमोदनाय अभ्यागता। नन्द्यताममुष्याः पठनेन, वाच्यतामाशिषः संस्कृतसङ्घाय।

——x——

कृतज्ञता

संस्कृतसम्भाषणशिबिरसमायोजनाय कक्ष्याप्रदानं कृतवते विमानोपग्रहविभाग-प्राचार्याय श्री बी. रघुनन्दनमहोदयाय, कार्यक्रमचित्रीकरणाय चलच्चित्रसङ्ग्राहक-यन्त्रं अनुगृहीतवते विद्युद्विभागप्राचार्याय श्री के. आर्. रामकृष्णन् महोदयाय, विद्युत्सम्पर्कविभागप्राचार्याय नवकान्तभट्टाय च, सम्भाषणशिबिरसञ्चालन-सूत्रधारिण्यै 'संस्कृतभारती' संस्थायै,अन्तर्जालस्थाननिर्माणाय कृतसाहाय्याय नन्दु-अभ्यङ्करमहोदयाय, तस्य कार्यनिर्वाहकवर्गाय च (अन्तर्जालस्थानव्यवस्था[1]), वाग्गेयकाराराधनमहोत्सवसंविधायै कृतोपकारायै डा. शारदामहोदयायै, निज-वाङ्माधुरीविजितजनावलिमनोभ्यां सर्वकालसर्वावस्थासु वात्सल्यपूरितहृदा कृत-मार्गनिर्देशनाभ्यां अवधानिभ्यां गणेशशङ्कराभ्यां, अनवरतमस्माकं योगक्षेम-विचारणपराय विद्युद्विभागप्राचार्याय श्री जी. नारायणन् महोदयाय, "संस्कृतिः" पत्रिकायां लेखनप्रकाशनार्थं कृतानुमतीनां सर्वेभ्यः विद्वभ्यः, कविभ्यश्च, संस्कृतगद्यपद्यकाव्यरचनास्पर्धाविजेतृणां पारितोषिकप्रदानाय, वाग्गेयकार-आराधने-त्यादिकार्यक्रमनिर्वहणाय च कृतधनसाहाय्येभ्यः दातृभ्यः, सभाकार्यनिर्वहणाय वेदिकां प्रदत्तवद्भ्यः चोक्सिसभाङ्गण–सतीशधावनसभाङ्गाणसञ्चालकेभ्यः, सर्वान्

[1] http://sanskritdocuments.org

कार्यक्रमान् सम्यक् सम्पादयितुं प्रत्यक्षे वा परोक्षे वा साहाय्यं कृतवद्भ्यः नैकेभ्यः कार्यकर्तृभ्यः, विद्वद्भ्यः, गुरुभ्यः संस्कृतसङ्घः हृदयपूर्वकं कृतज्ञताभिवन्दनानि समर्पयति।

——x——

सम्पादकीयम्

द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च।
प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम्॥
– भट्टतौतः

महत्यस्मिन् लोके चकासति वाग्देवीस्तन्यजन्यशास्त्रसाहित्यसुधारसन्धय-धन्यजीवनाः लब्धप्रतिष्ठाः भूयिष्ठाः विपश्चितः। गैर्वाण्यनुग्रहद्युमणिद्युतिप्राप्त-समानप्रज्ञोपज्ञप्रतिभाभासितानां निजकवनकौशलवशीकृतरसिकमनसां, कवि-वरेण्यानां रचनाचन्द्रिकोद्दीपितसुन्दरसरसीयं रसमयी पत्रिका।

आत्मानन्दरसानुभवतटिनी रीतिगुणरसौचित्यालङ्कृतितरङ्गिणी वागर्थवाहिनी च साहितीस्रोतस्विनी। परिपूर्ण-आत्मानन्दप्रतीरोन्नयकं वेदवाङ्मयं चेत्, निर्मल-रसानुभवकारकं जानपदसारस्वतम्। एतद्द्वैतट्यं पत्रिकायामस्यां अपर्याप्तामृतस्य 'साधनचतुष्ट्यप्रकाशिका' इति गद्येन, शतावधानैः गणेशमहोदस्य 'अग्राम्यम्' इति पद्यकाव्येन च स्पृष्टम्। यथा निलिम्पतटिनी त्रिपथगा मर्त्यलोकं पूतं करोति, तथैव सुपर्वाणवाणी संस्कृतभाषा धरित्र्यां संस्कृतिमुज्जीवयति, करोति च पावनानि जनचेतसः। तां दैवीं वाचं रामानुजसहितो शङ्करः रमणीयमश्लाघयत् 'संस्कृतवैशिश्ट्यम्','नमस्ते सुरभारति' इति गद्याभ्याम्। तथा च दैनिकजीवने संस्कृतप्राधान्यमुद्दिश्य श्रीमान् लक्ष्मीनारायणभट्टः 'यत्स्वल्पमपि तद्बहु' इत्यस्मिन् गद्ये दिशानिर्देशं कृतवान्। वंशीकृष्णघनपाठिनः 'शब्दशक्तिः' इति गद्यम् अन्वर्थनाम चकास्ति। आशुगद्यपद्यरचनाप्रतियोगितायां लब्धप्राथम्ये 'विवाहः' इति हास्यप्रबन्धः, 'समुद्रवर्णनम्' च प्रकाशिते। गैर्वाणीचरणसेवाभिलाषिभ्यः कवनेच्छुकेभ्यः अवश्यपाठ्यान्यपि प्रदत्तानि।

आद्यन्तं रसवत्तरायाः आसक्तिप्रेरकायाः अस्याः पत्रिकायाः पाठकाः संस्कृताभिमानिनः काव्यरचनोत्साहिनश्च भवेयुरिति शम्।

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति तेषां यशः काये जरामरणजं भयम्॥

——x——

विषयसूची

१. अग्राम्यम्

— शतावधानी डा। रा. गणेशः
बेङ्गलूरुनगरम्

ताम्बूलद्रवपाटलास्यविलसन्मैत्रस्मितेनाञ्जसा
द्वारि स्वागतिकास्ततः सकुशलव्याहारपेयप्रदाः।
पश्चात्सात्त्विकभौजिकास्तदुपरि स्थूलोर्णके शायना
नैजातिथ्यसुखव्रताः प्रतिदिनं घट्टप्रदेशे जनाः॥ १॥

आदौ पाद्यमुदाहरन् सनमनं पेयं जलं शीतलं
पश्चात्प्रीतिभरेण पिच्चिलगुडोपेतं ततोऽभ्यन्तरे।
स्निग्धस्मेरमुखेन कम्बलतलं सन्दर्शयन् पृच्छया
हार्दिक्या परितोषयत्यनुदिनं घट्टे गृहस्थोऽतिथीन् ॥ २॥

ईषत्कम्पितजर्जराधरपुटव्यक्तस्तुतिप्रक्रमा
हारिद्रद्युतिगण्डपार्ष्णिकरभा सिन्दूरसीमन्तिनी।
फालव्यायतकुङ्कुमा कबरिकाऽनद्धार्घपुष्पा प्रगे
वृद्धा बद्धकरा निबद्धनयना वृन्दावनाग्रे स्थिता॥ ३॥

गेहालिन्दतलोपविष्टवनिता हृद्यापराह्णेऽञ्जसा
नानाशोभनगीतपाठनकथासञ्जल्पनप्रक्रमैः।
चञ्चद्वर्तिपलाशपत्रपटलीनिर्माणकर्मादरा
ग्रामे तत्पदवीमुपेतवणिजामाकूतिमुग्धा मुदा॥ ४॥

गोष्ठोपान्तपुराणभित्तिपटले ताम्बूलनिष्ठीविते
स्वेदार्द्रालकसङ्कुलं तु मणिना सूत्तम्भयन्ती मुहुः।
क्रेङ्कुर्वद्वलयैश्चपेटरटितैस्तालक्रमं तन्वती
सोल्लासं सतुषं करीषनिचयं निर्माति नर्मानना॥ ५॥

सिन्दूराङ्कितजर्जनीविरचितैरङ्कैः कलङ्कीकृते
कुड्ये कीलितदीर्णदर्पणतले बद्धेक्षणा भावुका।
गायन्ती त्रिपदीः कलं रतिगणप्राणास्पदैः कर्शितैः
पल्लीवल्लविका प्रसाधनपरा लज्जास्मितालङ्कृता॥ ६॥

स्रोतोमातृकवप्रसीमसु बककौञ्चाङ्कितेष्वञ्जसा
जङ्घादघ्नजलेषु कोमलहरिच्छाल्यङ्कुरारोपिकाः।
तिष्ठन्त्यो नतभङ्गिभासितकटत्वङ्गत्करङ्काः प्रगे
प्रत्नैलापदगानगन्धहसितैश्श्रान्तिं हरन्त्यात्मनः॥ ७॥

अङ्गारान् प्रतिवेशिनीकरुणया द्वित्रान् क्वचित्सञ्चितान्
नीलस्थूलकरीषखण्डनिहितांस्तेनैव संवेष्टितान्।
आसाराद्वलभीकृतात्मवसनप्रागञ्चलेनाञ्जसा
पाती प्रातरुपैति वक्रमरुता ध्मान्ती गृहं गेहिनी॥ ८॥

क्रेङ्कुर्वत्कलधौतकाचवलयैराकूर्परव्यापकै-
र्वल्गत्पाणिपुटे निधाय जरठां वीटीपुटीं नीरसाम्।
मुष्णत्यग्रनखेन शुष्किलसुधाखण्डं करण्डाच्छनै-
र्निष्ठानिष्ठुरपूगभागदशनव्यग्रा पलिक्नी स्थिता॥ ९॥

मध्याह्ने चिरबिल्वभूरुहतले भुक्तान्नमाह्लादयन्
स्वच्छन्दं वपुषं प्रसार्य मधुरैर्मन्दानिलैर्लोलितः।
तन्नैसर्गिकभोगभावितमना निश्श्वासदीर्घीकृत-
ध्यानो नैव सुषुप्तिमेति सुचिरं श्रान्तोऽपि पान्थो युवा॥ १०॥

वीरेशस्तुतिवर्णकान्युपलपंस्तत्रान्तरे तर्जयन्
युद्धे नद्धहुडून् पथच्यवदजान् वाटीचरावींस्तथा।
कोटिस्फोटनकिङ्किणीकलवलद्वक्राग्रवेत्रं वहन्
मस्तन्यस्तपलाशराशिरयते रल्लावृतो वार्ष्णिकः॥ ११॥

वासोमूतभरेण मन्थरगतिं बालेयमास्फालयन्
तप्स्यत्ताम्रकटाहकीलितपटव्यालोडनोत्कण्ठितः।
पारे पल्वलमात्मधावनशिलालुब्धं जनं तर्जयन्
तन्त्रीसन्ततधौतवस्त्रपटलीं याति क्षिपन् धावकः॥ १२॥

फाले पावनिपट्टिकां गलतले प्रालम्बकं काम्बवं
बद्ध्वा भल्लुकचर्मवर्म ककुदि श्राव्याङ्गदानङ्घ्रिषु।
किर्मीराम्बरखण्डिकाभिरभितः प्रच्छाद्य सण्डं प्रगे
प्रत्यागारमुपैति नर्तयितुमित्युद्गीतिको भाद्रिकः॥ १३॥

आमील्याक्षियुगं पुरस्स्थितममुं निष्पन्दकर्णं वृषं
रोमन्थैकरसं स्वभाग्यभवनद्वाराभशृङ्गान्तरम्।
सस्नेहं गलकम्बले परिमृशन् भूयस्तृणं व्याहरन्
श्मश्रूत्तेजनपूर्वकं प्रियसखानालोकते हालिकः॥ १४॥

गोष्ठे ग्रामिकपुत्रनूतनवधूदत्तान्नमान्येद्यवं
तस्यास्सस्पृहलोचनान्तरुचिमच्चिञ्चोपलेह्योर्जितम्।
स्मारं स्मारमसौ कडङ्गरजलं संस्थापयन् पृष्ठतो
जातोक्षस्य विलज्जते भृतियुवा सन्तर्जितो गोमता॥ १५॥

——x——

२. संस्कृतवैशिष्ट्यम्

— वेदवारिधिः प. रामानुजः
बेङ्गलूरु

प्रस्तावना

भारतीयविज्ञानसंस्थायाः संस्कृतसङ्घेन आचार्यमाणमहोत्सवविशेषाङ्गस्मरण-सञ्चिकान्तर्गतत्वेन मुद्रापयितुं प्रार्थितलेखनत्वेन इदं लेखनं प्रस्तूयते। सङ्घस्योद्देश-दृष्ट्या कार्यक्रमस्य दृष्ट्या च संस्कृतभाषायाः वैशिष्ट्यविषये किञ्चिदत्र विज्ञापयामि। संस्कृतभाषायाः आधुनिकसमये प्रासङ्गिकत्वं विचार्य, तस्यां दिशि प्रवृत्तप्रयोग-विशेषेषु कांश्चिदुल्लिख्य, भविष्यति काले शक्यसंभावनान् प्रक्रमान् कांश्चित् निर्दिश्य, संस्कृतज्ञैः आधुनिकवैज्ञानिकैश्च संभूय प्रयत्नान् विधाय सार्वजनिकस्तरे लभ्यसौकर्यविशेषविषये निगमनं चात्र चिकीर्षितम्।

उपोद्धातः

प्रायः अद्यत्वे जनेषु द्वयी प्रवृत्तिः संस्कृतभाषाविषये दरीदृश्यते।

एके तावत् "यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्" इति रीतिं आतिष्ठन्तः, संस्कृतवाङ्मये अविद्यमानं, अविमृष्टं, अनिर्णीतं, असिद्धं, अलब्धं वा न किमपि विद्यते, तत्र च दोषगन्धलेशोऽपि नास्ति, सुसंस्कृतत्वात्, देववाणीत्वात्, "भाषासु मुख्या मधुरा दिव्या गैर्वाणभारती। यस्यां सर्वाणि शास्त्राणि काव्यानि ललितानि च" इत्यविगानेन संमतत्वात् इत्यादि अभिप्रयन्ति। श्रद्धालवः, साम्प्रदायिकाः, प्राचीनाः, अनद्यतनीनाः, अप्रासङ्गिकाः इत्यादिनामभिः

एते व्यवह्रियन्ते, भावनाजीविनः इति च कथ्यन्ते। एतैः प्रायेण अन्तर्मुखैः आधुनिकवैज्ञानिकप्रगतिविषये अश्रद्धा, अज्ञानं, उपेक्षा, मात्सर्यं वा प्रदश्र्यते इति अपोद्यते अन्यैः। गृहीतग्राहित्वमेषां दोषः इति यावत्।

अपरे तावत्, संस्कृतमयं प्राचीनं सर्वं त्याज्यं (विशिष्य भारतीयः चेत्), अत्र परामर्शयोग्यं न किञ्चिदप्यस्ति, एषा मृतभाषा, केवलं केषाञ्चित् वर्णानां कृते एव वरीवर्ति, जनेषु अवास्तविकभूत-उत्कर्षनिकर्षादिकारकं, केवलं आध्यात्मिकादि पारलौकिकविषयप्रतिपादनेन अनुपयुक्तं, न केनापि सुवेद्यं, परस्परव्याहतसिद्धान्तैः संकीर्णं, ताटस्थ्येन न परीक्षितं, अतः आधुनिकपाश्चात्यवैज्ञानिकप्रगतिरेव सर्वोपयोगि, तत्र भारतीयानां केवलं दास-वृत्तिरेव युज्यते, यदिपाश्चात्याः केचन संस्कृतस्य श्रैष्ठ्यं अभ्युपयन्ति चेदपि तत् अन्यार्थं, काकतालीयं, उपच्छन्दनं वा भवितुमर्हन्ति, यद्वा भाषास्वन्यतमत्वेन साहित्यार्थं रसिकैः उपयुज्येत, यत्र कुत्रापि शक्यः अल्पातिशयः अत्रापि स्याच्चेत् भवतु नाम, तावता को विशेषः, अद्यत्वे तु नूतनं न किमपि निर्मीयते, शास्त्रकालस्य गतवैभवत्वात् इत्यादि वदन्तः साम्प्रदायिकैः लोकायतिकत्वादिशब्दैः विनिन्द्य उपेक्ष्यन्ते।

अतः मध्यम्यां वृत्तिमास्थिताः केचित् तु, "पुराणमित्येव न साधु सर्वं न चापि किञ्चित् नवमित्यद्यवद्यम्। सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः" इति रीत्या वस्तुस्थितिं अन्वेष्टुं प्रयतेरन्, असङ्कोचेन सत्यं अभ्युपगच्छेयुश्च। तादृशपरीक्षार्थं उभयपक्षस्यापि ज्ञानं यावदपेक्षितं तावदासादनीयमेव, पूर्वाग्रहं विना विचारश्च विधेयः, अज्ञातविषयेषु टीकाटिप्पण्यादयः स्वमतिविलासेन न

कार्याः, प्रमाणप्रमेयादिविशिष्टरीत्या सन्तर्क्य युक्तिप्रमाणान्यतरयुक्तं स्वीकार्यं, वीतरागैः अपक्षपातिभिः विचारः तत्त्वजिज्ञासया केवलं, न तु जिगीषादिना च प्रवर्तनीयः।

वेदशास्त्रादीनां विषये विचारः

यद्यपि श्रद्धालूनामेवैते रोचन्ते, आधुनिकानामश्रद्दधानानां, शास्त्रैरेव बहिष्कृतानां च तत्र बोधादिकं न शक्यमिति उपर्युक्तविचार एव न सेत्स्यति, किमु वक्तव्यं तत्र विमर्शे, निर्णयादिविषये इत्युच्येत, तथापि वादिप्रतिवादिनोरुभयोरप्यत्र तुल्ययोगक्षेमत्वात्, ग्रीक्, लातिनादिभाषासु पाश्चात्यमूलतत्वशास्त्रप्रणयनात्, आधुनिकेपि युगे उच्चतमप्रौद्योगिकादिषु परमाण्वस्त्रादिप्रयोगविधीनां भारतीयादिभिः अस्प्रष्टव्यत्ववादादिसाम्यात् 'यत्रोभयोः समो दोषः...' इति न्यायप्रसारः।

प्रकृते 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥' इति निर्दिष्टानां विद्यास्थानानां 'पुराणन्यायमीमांसाधर्मशास्त्राङ्ग-मिश्रिताः। वेदाः स्थानानि विद्याया धर्मस्य च चतुर्दश॥' इति धर्मस्थानत्वेन च स्मरणात् जगतः धृतिसाधनत्वमेषां विद्यास्थानानां यथा न हीयेत तथा विचारः विधातुं युक्तः। "अधीतबोधाचरणप्रचारणैः दशाश्चतस्रः प्रणयन्नुपाधिभिः। चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥"(नैषधे) इतिवत् न केवलमध्ययनम्, अपितु मनन-आचरण-प्रचादिकं च कार्यमिति।

एषु ऋक्-यजुः-साम-अथर्वरूपेण चत्वारः वेदाः, तेषां षडङ्गानि, वेदस्य पुरुषरूपितस्य घ्राण-मुख-पाद-श्रोत्र-चक्षुः-हस्तस्थानीयानि, क्रमशः शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पः इति प्रसिद्धानि, तथा

चत्वारि उपाङ्गानि न्यायविस्तरः, मीमांसा, पुराणम्, धर्मशास्त्रमिति प्रसिद्धानि च अन्तर्भवन्ति। वेदाः अपौरुषेयाः नित्याश्च। संहिता-ब्राह्मण-आरण्यक-उपनिषद्भेदेन प्रतिवेदं विभक्ताः अनेकशाखासंभिन्नाः यजुष्षु शुक्ल-कृष्णभेदवन्तश्च। तेषां प्रतिवेदं प्रतिशाखं च अनेके महर्षयः मन्त्रद्रष्टारः प्रवर्तकाः आसन्। एते वाताशनाः, श्रमणाः ऊर्धवरेतसः तपसा ब्रह्मचर्यादिना प्राप्तपरब्रह्मानुभवाः, तस्य स्वयं तान् प्रत्यागमनात् ऋषित्वप्राप्तिरिति च श्रूयते। 'यामृषयो मन्त्रकृतो मनीषिणः। अन्वैच्छन् देवास्तपसा श्रमेण। तां देवीं वाचँ हविषा यजामहे।' (तैत्तिरीयब्राह्मणम् २.८.९), 'वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुः', 'अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् तदृषीणामृषित्वं...' (तैत्तिरीय-आरण्यकम् २.७.९)।

अनादिकालात् अविच्छिन्नगुरुशिष्यश्रवणपरम्परया विशिष्टक्रमेण अद्यापि श्रूयन्ते। सत्सन्तानप्रसूत-सदाचारनिष्ठ-आत्मगुणोपेत-वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्य (अन्तेवासिनः शुश्रूषोः) गुरुमुखोच्चारणानूच्चारणपूर्वकं अक्षरराशिग्रहणफलम् अध्ययनमित्युच्यते (श्रीभाष्ये)। वेदाध्ययनं च साङ्गं निष्कारणेन कार्यमिति विहितं 'स्वाध्यायः अध्येतव्यः (तैत्तिरीय-आरण्यकम् २.१४)', ऋषीणां ऋणापकरणार्थं च 'जायमानो वै ब्राह्मणास्त्रिभिः ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी (तैत्तिरीयसंहिता ६.३.१०)', 'नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यः (तैत्तिरीय-आरण्यकम् ७.१)' इत्यादिषु।

विनापि अर्थज्ञानं गुरुमुखात्प्राप्तस्य वेदस्य अक्षर-स्वर-मात्रा-प्रयत्नादिषु

विना भ्रेषं उच्चारणस्य अत्यन्तं माहात्म्यं विद्यते यतः अक्षराद्यन्यथाभावेन उच्चारणे वेदप्रतिपाद्यार्थस्य अन्यथाभावः स्वाभाविकः। "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥", "तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते (पाणिनीयशिक्षा)" इति च स्मरणात्। साङ्गाध्ययनेन अर्थज्ञानं प्राप्योच्चारणे महान् विशेषश्च श्रुतः 'ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।'(तैत्तिरीय-आरण्यकम् २.११), 'योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा' इति। स्मृतश्च 'यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥' इति।

वेदाङ्गोपाङ्गानां प्रमेयभूता विषयास्तावत् महर्षिभिः अतीतानागतादि-साक्षात्कारवद्भिः, तत्त्वदर्शिभिः, द्विपाच्चतुष्पाद्विशेषेण सर्वलोकहिते रतैः सर्वत्र शान्तिकामैः सूत्रादिमुखेन प्रवर्तिताः। वार्तिक-भाष्यादिभिः व्याख्या-टिप्पण्यादिभिः ग्रन्थैः अनन्तरवर्तिभिः विवृताश्च। तत्त्वज्ञान-विचार-विमर्शादि-सिद्ध्यर्थं सिद्धान्तोपस्थापनार्थं च पूर्वपक्ष-सिद्धान्तमुखेन, उद्देश-विशेषण-उपलक्षणान्यतररूपेण लक्षण-अव्याप्त्यतिव्याप्त्यसम्भवादिरूपेण परीक्षाक्रमेण च बहवः उपायाः शास्त्रेषु ये तावत् सर्वलौकिक-सार्वत्रिकजिज्ञासूनां अत्यर्थमुपकुर्वते।

प्रासङ्गिकता

अतः संस्कृतस्य प्रासङ्गिकताविषये यद्यपि शास्त्राणां अध्ययनं देशकाल-वैगुण्यात् पूर्वतनकालवत् केवलं ज्ञानाद्यर्थं परम्परासंरक्षणार्थं पारमार्थिकरूपेण

यथाक्रमं न शक्यते कर्तुं, तथापि तत्रत्यप्रक्रियाविशेषाः, विषयप्रतिपादनशैली, विचारमार्गः, प्रमेयलक्षणाद्यर्थं पद-पदार्थ-प्रकरण-तात्पर्यादिनिरूपणप्रकारः इत्यादि सार्वत्रिकं सार्वदिकं चोपकारमातन्वते। पठन-पाठन-संशोधनादिषु, भारतीयभाषाणां कृते च बहूपयुक्ताः इति तु निश्चयेन वक्तुं शक्यते। अन्यश्चात्र विषयः अवधेयः यत् आधुनिकमस्तिष्कयन्त्रादिप्रणालीष्वपि संस्कृतस्य उपयोगः शक्यः अस्ति येन शास्त्राध्ययनाय सौकर्यं कल्प्येत। जनप्रियमाध्यमेन शास्त्राध्ययनरुचिवर्धनं तेन जनानां सुशिक्षिततत्वसम्पादनं च प्रयतितुं युक्तम्। प्रसारण-विनिमय-विचाराद्यर्थं विभिन्नदेशकालादिषु स्थितानां युगपत् भागग्रहणं च अत्र उपयुक्तो भवति। बहुमाध्यमद्वारा (लिपि-शब्द-स्थिर/चलचित्रणादि) ज्ञानकार्येषु सौविध्यं विधीयेत। प्रान्तीयभाषासु भाषान्तरणम्, तत्तल्लिपिषु लिप्यन्तरणम्, मूलग्रन्थानां समक्षं दर्शनम्, शोधनम् इत्यादि शक्यते कल्पयितुं इति प्रचारपथात् निरस्तस्यापि पुनरुज्जीवनं साध्यम्। एतत्तु अस्माकं आर्षेयपरम्परां श्रद्धावर्धनार्थं पूर्वजानां वृत्तान्तादिज्ञानार्थं तत्र साभिमानप्रवृत्त्या सर्वप्रान्तभाषा, कलाचारादिषु गौरव-सम्मानादिसिद्ध्यर्थं च उपकुर्यात्।

प्रयोगाः प्रवृत्तयश्च

प्रायः विंशत्युत्तरवर्षेभ्यः संस्कृताध्ययनस्य भाषाविज्ञानादिषु अद्यतनापेक्षा-पूरणार्थं बहुत्र प्रयोगाः प्रचलन्ति। भारते च पाश्चात्यकार्याणां उदाहरणेन केचन प्रयोगाः संस्कृतज्ञानां आधुनिक कम्प्यूटर् यन्त्रज्ञानां च सम्मेलनार्थं विचारविनिमयार्थं च आयोजिताः, येषु १९८६तम-ईसवीयवत्सरे ज्ञानप्रतिरूपण-विषये बेङ्गलूरु मध्ये विचारगोष्ठी, १९८९तम-ईसवीयवत्सरे नवदेहल्यां संस्कृतं

तथा कम्प्यूटर् इति विषयमधिकृत्य संगोष्ठी, अनन्तरं भारतीयसर्वकारस्य सूचनाप्रौद्योगिकीमन्त्रालयेन भारतीयभाषाणां कृते बहवः प्रकल्पाः प्रगतसङ्गणक-विकासकेन्द्रद्वारा भारतीयप्रौद्योगिकीसंस्थाभ्यः, भारतीयविज्ञानसंस्थातः, अन्य-विश्वविद्यालयेभ्यः, संस्कृतसंस्कृतसंस्थाभ्यश्च प्रवृत्ताः।

एषु प्रगतसङ्गणकविकासकेन्द्रेण भारतीयलिपीनां मस्तिष्कयन्त्रे उपयोगार्थं मानकनिर्माणं, तदनुसारेण अक्षराकृत्यादीनां प्रकल्पनं, तेन कम्प्यूटर् यन्त्रे प्रदर्शन-मुद्रणाद्यर्थं प्रबन्धः, शब्दकोशादीनां निर्माणम्, ग्रन्थानां यन्त्रे आरोपणम्, अन्वेषणसूच्यादिनिर्माण-आकरप्रदर्शन-देशिकनामकव्युत्पत्तिसाधक-सुबन्त-तिङन्तादिनिष्पत्ति-सस्वरवैदिकसन्ध्यादिविकृतिपाठादीनां प्रकल्पनम्, शाब्दबोध-प्रतिरूपणम्, सी-व्यासनामकप्रकल्पे वेदानां साङ्गाध्ययनाय सौकर्यप्रकल्पनम्, पाण्डुलिपिसंशोधकनामके कार्यक्रमे तालपत्रादिभ्यः अमुद्रितग्रन्थानां परिष्कृत्य मुद्रापणम्, ग्रन्थालयेषु विद्यमानानां पाण्डुलिप्यादीनां चित्ररूपेण परिवर्त्य यन्त्रे निवेश्य एषु ग्रन्थेषु विद्यमानापूर्वविषयाणां संशोधनेन, अनुसन्धानादिकं कर्तुं विदुषां साहाय्यं स्वीकर्तुमपि सौविध्यम्, व्याख्यादिलेखनम्, पदादिसूची-उदाहृतग्रन्थादिसूचीनिर्माणम्, उदाहरणानां आकारान्वेषणमित्यादि बहुप्रकारेण भारतीयपरम्परायाः ज्ञानभण्डारसंरक्षण-संशोधन-वितरणाद्यर्थं कृताः कार्याः निर्देशार्हाः।

कर्तव्यशेषः

शिक्षाप्रणाली यदि भारतीयभाषासु निहितस्य निधेः सम्यक् अवगमने विद्यार्थीनां प्रशिक्षणं दत्वा पाठ्यक्रमे सूक्तं परिवर्तनं कृत्वा परीक्षणादिष्वपि

रटनाद्यपहाय अस्य विशालस्य राष्ट्रस्य विभिन्नकोणेषु अद्यापि विद्यमानस्य भारतस्य प्रतिष्ठारूपाणां अज्ञातानां महानिधिप्रायाणां ज्ञानकोशानां उद्घाटने सामान्यजनपर्यन्तं परिष्कृत्य नयने उपकाराधायककार्यं कर्तुं प्रचोदयेच्चेत् सर्वेषां सर्वतोमुखाभ्युदयाय भवेत्।

अन्तर्जालादिषु सम्पर्कमाध्यमद्वारा लिखित, भाषारूपोच्चारणाधारितयन्त्र-प्रणालीविकसनेन तदर्थोपयुक्तप्रक्रियादीनां परिकल्पनेन च कार्यममुं सर्वव्याप्यान्दोलनरूपेण सफलयितुं सर्वे मिलित्वा प्रयतेरन्। विद्वांसोऽपि स्वीयक्षेत्रेषु ज्ञानविकासार्थं अनुसन्धानं प्रक्रम्य तदर्थापेक्षितांशान् यन्त्रज्ञैः कारयेयुः येन उभयोः उभयगतगुणानां लाभः स्यात्, उभयगतदोषाणां अपहानं च सिद्ध्येत्।

विशिष्य इदानीन्तनकाले 'यूनिकोड्'नाम्ना प्रवर्तमानवैदिकस्वरादिद्योतक-चिह्नानां अन्तर्भावने अनुभाव्यमानलोपदोषादीनां अपाकरणार्थं साम्प्रदायिकाः मिलित्वा तेषां तालपत्रादिभ्यः सङ्ग्रहणे, समाकलने, विभिन्नलिपिगतविशेषांश्च अन्तर्भाव्य निष्पन्तरण-नूतनलिपियोजन-गवेषण-सूच्यादिनिर्माणसौकर्यं, लेखन-मौखिकरूपयोर्मेलने च शक्तियुक्तप्रणालीविकासे च सादरं सततं च प्रस्येयुरिति च प्रार्थ्यते।

एवमेव मुद्रितप्राचीनकोशेभ्यः चित्ररूपप्रतिकृतिं कृत्वा, तेभ्यः कम्प्यूटर् यन्त्रगत 'साफ़्ट् वेर्' द्वारा तत्रत्य अक्षरपरिज्ञाने साफल्यं प्राप्तुं च प्रयत्नेन टङ्कनप्रयासाः दूरीक्रियेत। परन्तु एतत्कार्यं क्लिष्टम्, प्रतिलिपि-आवर्तनीयम्, मुद्रितादपि हस्तलिखितानां, तत्रापि पाण्डुलिपि, तालपत्रादीनां अवगमने दौष्कर्यातिशयेन च बहुप्रयाससाध्यः। अपितु भगीरथसदृशाः केचन साधयेयुरिम-

मपि कार्यमिति निरीक्ष्यते। अस्मिन्नेव कार्ये तादृशग्रन्थान् पठित्वा, ध्वनिमाध्यमेन संगृह्य, ध्वनेः अक्षरपरिज्ञान, परिवर्तनादिषु प्रयतितुमपि शक्यते। एतदपि क्लिष्टम्, परन्तु पूर्वतनात्सुकरः, उपयुक्ततरश्च, यदर्थं ध्वन्याधारितमानककल्पनमपि क्रियेत। अत्र एकस्याः भाषायाः अनेकलिपिषु लेखने परिज्ञानसौकर्यातिशयश्च सिद्ध्येत्।

अतः अन्ते ईदृशकार्यादिषु कुशलिनः कुतूहलिनश्च भूयांसः उद्भवेयुः प्रभवेयुश्च स्वप्रयत्नेष्वित्याशास्य विरमामि॥

॥ शुभमस्तु ॥

——x——

३. नमस्ते सुरभारति

— डा। शङ्करः
एफ़् आर् एल् एच् टि, यलहङ्कः

इह खलु जीयान्महति वसुधावलये सुधायमानासु भाषासु प्रथमतया प्रथमाना, पितामहमहिषीपादारविन्दपरिचितसुरसरिद्वालुकाचरबालमरालमधुरालाप-लीलापिशुना शुनासीरपुरीविलासोपवनविटपिकलपिकनिकरसरसपञ्चमचमत्कार-पारगोदारसारस्वतसारस्वतन्त्रामन्त्रायमाणवर्णविन्यासधन्या कलिन्दकन्याकूल-तमालतरुमूलविलोलकेलिगोपालपाणिजाग्रसञ्चारचातुरीधुरीणमणिमयमुरलीस्वर-सर्वस्वरसज्ञा प्रज्ञापुरन्ध्रिकासीमन्तसन्ततध्रियमाणसौभाग्यसिन्दूरलेखा लेखापगा-प्रवाहसाहचर्यमर्यादारक्षणैकदीक्षादक्षनिबिडाक्षरशरण्यशब्दाकारसारसागारसरसी प्रणवपरिमलमलयानिलोर्मी निगमकमलाकरकलहंसी गहनोपनिषद्रहस्यमय-रत्नसम्पुटोद्घाटनकुञ्चिका धर्मनिधिरक्षाभुजगी कवनोपवनवसन्तश्रीरपवर्गमणि-मन्दिरद्वारवन्दनमन्दारमालिका न्यायविद्यावियद्वाहिनीरभसोचितभूतेशजटामकुटी योगाश्रमविपिनस्थली व्याकरणवदनकर्पूरगुलिका छन्दश्चरणपादुका ज्योतिष-नयनाञ्जनशलाका निरुक्तश्रवणसुवर्णावतंसश्रीः कल्पाकारकराकल्पकनकवलय-लीला शिक्षाघ्राणचन्दनक्षोदसुरभिर्धनुर्वेदमहाध्वरवेदिका वैद्यागमदिव्यौषधि-हिमालयोपत्यका स्थापत्यविद्यासालभञ्जिकाविलासैकसुवर्णस्थूणा नृत्यकलाकलापिनी-विभ्रमावासयष्टिका मीमांसामधुकरीमांसलक्षौद्रपटली वेदान्तदन्तावलदानधाराय-माणवर्णमाला साङ्ख्याक्षसूत्रगणनाङ्गुलिर्वैशेषिकवचोमयविश्वनिर्माणपरमाणुपरम्परा स्मृतिसोमकलाप्रतिपन्निशीथिनी पुराणभित्तिपटलशश्वन्नूतनावलेपसुधा रामायण-

प्रदीपैकरक्षणकरसम्पुटी व्यासवचोमयमहासागरभरणसुरतरङ्गिणी बृहत्कथा-शिबिकावलम्बनस्कन्धभूमिर्भासनाटकनक्षत्रनिवहोल्लासजलदपदवी श्रीकालिदास-कविताकल्पवल्लीनन्दनोद्यानदेवता भारविभणितिगुणगुञ्जाभूषणशबरी माघ-मान्त्रिकमयूरपिच्छिका श्रीहर्षवर्षारम्भकदम्बवाटिका भट्टबाणप्रबन्धार्भकपाञ्चालिका शूद्रकप्रकरणोज्जयिनीनगरशिप्रातटी दण्डिदण्डोद्ध्रियमाणविजयवैजयन्तिका भवभूति-करुणरसकल्पिताभिषेकोत्सवा विशाखदत्तवचोहविरादानमखानलज्वाला रत्नाकर-काव्यकल्लोलकौमुदी क्षेमेन्द्रचन्द्रवचनोत्सङ्गसारङ्गलेखा राजशेखरनिबन्धामोद-कर्पूरमञ्जरी कल्हणकवितातरङ्गिणीप्रभवाचलस्थली जयदेवगीतिकावल्लकीवादन-विहारोदारचारणरमणी मङ्खवचोविजयशङ्खा बिल्हणकविताकुङ्कुमवल्लरीकाश्मीर-भूमिर्भोजराजवचनमयनवाम्भोजशरल्लक्ष्मीरभिनन्दसन्दर्भसमीरणसुतसेवासमुचित-सीतासहायचरणच्छाया हालहालिकसस्यसम्पदमरुकशुकविलासकोटरस्थली विज्जिकावाणीविनोदवीणा गोवर्धनगोवर्धनवल्लवपल्ली योगेश्वरवचोग्रामसीमादेवता सोमदेवकथासरित्सागरवेला मेण्ठकविकण्ठभूषा वेङ्कटनाथवचोरथरथ्या गङ्गादेवी-कविताप्रवाहवाराणसी नीलकण्ठहृदयामोदसन्ध्या जगन्नाथयशःफेनकलशार्णव-लहरी चराचरजगच्चित्रोन्मीलनतूलिका भगवती संस्कृतभाषा।

त्रिवर्गश्चापवर्गश्च प्रियौ यस्याः स्तनन्धयौ।
तस्यै त्रैलोक्यपूज्यायै नमस्ते सुरभारति॥

——x——

४. शब्दशक्तिः

— वंशीकृष्णघनपाठी
अवधूतदत्तपीठम्, मैसूरु

शब्दब्रह्म समातनोतु सततं शर्मेह संभावितम्।

समेस्मिन् सर्वधारिणि, भारतीयवैज्ञानिकसंस्थासंस्थैश्छात्रैस्संस्कृतसङ्घस्य वार्षिकोत्सवस्समाचर्यते, तदवसरे वार्षिकपत्रिका मुद्राप्यते चेति महतस्तोषस्यास्पदम्। संस्कृतशब्द एकोपि सम्यज्ज्ञातस्सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति भगवता पतञ्जलिना महाभाष्ये प्रत्यपादि। श्रोतुमिदं वाक्यमर्थवादरूपस्तुतिवाद इत्यापाततो यद्यपि भाति, तथापि सूक्तिमेकां ध्वनयन् महत उपकाराय प्रसिध्यति। तादृकश्छक्तिमदिदं शब्दमिति पर्यालोचने सम्प्रवृत्तोऽयं प्रबन्धः, तदीयप्रयोजनफक्किकाः, शक्तशब्दसाफल्यहेतुकानि प्रयोजनविधानानि च विशिनष्टि।

अव्याजकरुणैकसमभिव्यापृतनिजान्तरङ्गस्य परमेश्वराभिधानस्य जगदधिष्ठातुः सगुणब्रह्मणो निश्श्वसितं यत् समाख्यायते 'वेद' इति, निश्श्रेयसपर्यवसन्नं श्रेयोवापकमिति निश्चप्रचमेवास्त्याऽऽस्तिकलोके। तदेतस्मिन्नपौरुषेयेऽकृत्रिमे वेदग्रन्थे नराणां वाञ्छासर्वस्वपरिपूतये मार्गान्तरेणावबोद्धुं दुश्शका अनेकेऽध्वानः प्रकाममुपदिश्यमाना बहुलमुपलभ्यन्ते। सर्वाणुगतस्य ब्रह्मणो दर्शनाभ्यासयितृत्वात्, निरन्तरब्रह्मानुभुवात्मकस्वरूपानन्दप्रापयितृत्वात्, बृहत्तमत्वाच्च 'ब्रह्मे'त्ययं वेदग्रन्थो निर्वर्ण्यते बुधैः। तथा च, सगुण-निर्गुणब्रह्मपदार्थव्यावर्तनार्थं, सुखबोधार्थं च 'शब्दब्रह्म'संज्ञितं सद्विद्वल्लोके महीयते।

वर्णोच्चारनमूलकत्वेनाऽभिवव्यज्यमानश्शब्दो ध्वनिरिति च प्रसिद्ध्यते। तद्गता शक्तिः कियती, कीदृशीति परिशोधने सम्प्रवृत्ताः पौर्वात्याः पश्चिमात्याः पण्डिताः, 'ध्वनिशक्तिर्गरीयसी' इति निश्शङ्कमुपपेदिरे। श्रुतिपुराणवाङ्मये, मतान्तरप्रसिद्धे चार्वाचीन इतिहासे सृष्ट्यादि प्रक्रियायां जगत्स्रष्टा ध्वनिशक्तिमिमा-मेवोपयुयुज इति ज्ञायते।"स भूरिति व्याहरत्। स भूमिमसृजत।" (बैबिल्)- इत्थं प्रकारकैः परश्शतैर्वेदवाक्यैरर्वाचीनग्रन्थवाक्यैश्च ध्वनिमाध्यमेनैव सृष्टिक्रमः प्रववृत इति ज्ञेयं भवति।

ध्वनिरयं कीदृक्प्रभावं बिभर्तीति मीमांसायां - व्याहर्तुरास्याद्दुद्गीर्णो वाग्रूपो ध्वनिः श्रोतुः कर्णपुटमुपेत्य, तद्विवरस्थितध्वनिनालिकामाध्यमेन मस्तिष्क-मभिगच्छति, ततो मस्तिष्कावस्थितग्रन्थिभ्यो रसायनस्रावाद्विविधा अनुभवा, विभावा अनुभूयन्ते, प्रदर्श्यन्ते च प्रजाभिः। एवं तर्हि, ध्वनिशक्त्यपरनामिका शब्दशक्तिः प्रयोक्तृनिष्ठा, श्रोतृनिष्ठा वोभयनिष्ठेति वेत्तुमुपक्रमिष्यामः।

येन केनचिन्नरेण वाक्यस्यैकस्य समभिव्याहारेण, समाकर्णयितुर्मनसि कश्चन भाव उत्पद्यते। तथा चैतद्वाक्यप्रयोगानुकूलमानसिकव्यापारवान् व्याहर्ता च तादृशानुभवसमन्वितो भवतीति च लोकसिद्धमेव। तथा सति, वेदवाक्य-लौकिकवाक्यश्रवणोच्चारणयोः कश्चन विशेषो वर्ततेति परोशोधयितारोऽभिप्रयन्ति। परिशोधनपद्धतौ - वैयक्तिकशक्तिवलयपरीक्षा ('आरा' इत्याङ्ग्लभाषायां संज्ञिता) अत्यन्तमुपायुज्यत। प्रत्यणौ सकारात्मक-नकारात्मक-मध्यस्थ-भा-नामकाश्शक्तिप्रकाराः (प्रोटान्, एलेक्ट्रान्, न्यूट्रान्, फोटान्) विद्यन्त इतित् भौतिकशास्त्रप्रणेतार आधुनिका अवचन्। तथैव जन्तुषु, कृमिषु, स्थले,

जले, वायौ, अनेकेषु जडत्वेनाभिमतेषु भौतिकपदार्थेषु चैवंविधाशक्तिवरिर्तितीति प्रतिपाद्य, तन्निरूपणाय मापकयन्त्राणी च निर्ममिरे। तत्साहाय्येन कृतेषु परिशोधनेषु, वेदादि शब्दोच्चारणेन सकारात्मकश्शक्तिर्विवर्धिता दूरङ्गमा सती परिदृष्टा। तदुच्चारणविरहिते स्थले, पूर्वपरीक्षायां न्यूनतरः, शब्दोच्चारणेन परिपुष्टो भूयांश्च शक्तिवलयो परिशोधकान् विस्मापयति स्म। तथा च, प्रयोक्तृ-श्रोत्रोश्च भूयस्त्वेनाभिदृष्टश्शक्तितरङ्गवलयो मनःप्रशान्तिमनिर्वाच्य मोदाद्यनुभूतिसूचक-स्समीक्ष्यते स्म।

वस्तुतोयं शक्तिवलयः, चैतन्यवत्त्वेनाभिमतेषु जीवसाधारण्ये एव प्रस्तुतो वा? अथवा अणुसाधारण्ये सर्वस्मिन् विद्यमानं वेति विचिकित्सायां - सर्वगोयं शक्तिवलयः, चैतन्यसूचक इति सोपपत्तिकं राद्धान्तं प्रब्रवन्ति विज्ञाः। तत्क्रमे, जलपरमाणवः डा. मसारु एमुटो नामकेन जपानदेशीयेन परिशोधनाय गृहीताः, शब्दस्य प्रभावात् तदीयसूक्ष्मरूपं विक्रियत इति समीक्षिताः। यथा लौकिकवाक्येषु निन्दा-स्तुति-हास्य-भय-तर्जन-भर्त्सन-प्रशंसावहाद्या अनेके प्रकाराः विविधानुभूतीः जन्तुषु प्रयोजयन्ति, तथाविधश्शनुभवो जलाणुष्वपि यदि वर्तते, तर्हि जलप्राचुर्यवति मनुष्यादिजीविशरीरे च तादृशः प्रभावो वर्तेतैव।

देशकालौ च शब्दप्रयोगं प्रभावयत इत्यनुमेयं भवति। यथा पौर्णमास्या-ममावास्यायां, चन्द्रमसो ज्योत्स्नाप्रयुक्ते सागरतरङ्गन्यूनाधिक्ये दरीदृश्येते, तथैव प्रतिशतं सप्तत्यधिकेन जलेनापूरितो नृदेहो चन्द्रग्रहसञ्चारप्रभावसमन्वितोपि स्यादिति फलति। अपि च मनोव्यापारसाध्यान्येव बहूनि कायिककर्माणि। ततो हि विविधकालेष्वाह्लाद-विह्वलादिभावस्फूर्तेः, धीमत्ता प्रचोदितानां आर्थिक-

विज्ञान-कविता-परिपालनादिनवविषयप्रादुर्भावादयश्च मनश्चन्द्रमसोस्सम्बन्धं द्रढयन्ति। अस्मात् बुद्धिवैशिष्ट्ययुक्तजिविनां मनुष्याणां मनांसि, देशकालसम्बन्ध-विशिष्टशब्दशक्तिप्रभावितानि भवेयुरित्यर्थः सिध्यति। तथैव व्यक्तौ व्यक्तौ स्वीयमनस्स्थितिप्रचोदितश्शक्तिवलयश्च न्यूनातिरिक्तस्सञ्जायत इति च विज्ञायते।

एवं सति, सोपपत्तिकं, सतर्कं शब्दप्रयोगविधानशास्त्रं यत्किञ्चिन्नियामकं स्यात्, येन नरो भूयिष्ठफलभाजनास्स्युरित्याकाङ्क्षायां, वेदशास्त्रस्मृतिग्रन्था अत्यन्तमुपकुर्वन्ति। प्राधान्येन सम्भावितास्त्रत्यांशाः १)विधिः २)अर्थज्ञानम् ३)अर्थस्मरणम् ४)भावशुद्धिः ५)द्रव्यगुणशुद्धिः ६)प्रत्ययः - एवमादयो बहवोंशाः श्रुति-स्मृति-पुराणागमप्रचोदिताः शब्दप्रयोजने तद्धेतुकफलसिद्धौ च साक्षादु-पकारककारणा इत्यविस्मरणीयम्। (विस्तरभयात् तेषां न प्रपञ्च्यन्ते।) अतः, सुष्ठुप्रयुक्तश्शब्द उपरितनसूचितगुणगणखचितो यदि प्रयुज्यते, तर्हि सिद्धिं प्रापयति, ऐहिकमामुष्मिकं फलमसास्तीत्, साध्नोति, साद्धेत्यलं विस्तरेण। एवं च हित-प्रियशब्दोच्चारणं सर्वजनमनोरामणीयकं सत्, प्रयोक्तुश्च मनः प्रमोदयेत्, तथाविधाभ्यासोऽस्माकं सम्पत्स्येत, येन श्रेयांसो भूयास्मेति शम्।

जयतु गुरुदत्तः

——x——

५. यत्स्वल्पमपि तद्बहु

— डा। लक्ष्मीनारायणभट्टः
प्राध्यापकः, विश्वविद्यानिलयः,
मंगलूरुनगरम्

‘अदत्वा परसन्तापं अगत्वा खलमन्दिरम्।
अक्लेशयित्वा चात्मानं यत् स्वल्पमपि तद्बहु’॥

इति मम बाल्ये यथा तथैवाद्यापि संस्कृतविद्यार्थिनां श्रोत्रे सूक्तिर्मुखरायते। प्रत्येकस्य जीवितावधौ किमपि साधनीयमिति प्रस्थानं सहजम्। तत्रापि महदेव साधनीयमित्यपि स्वाभाविकमिदम्। परन्तु बहु साधनीयमिति बुद्ध्या,

‘घटं भिन्धि पटं छिन्धि कुरु वा गार्दभस्वरम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भव’॥

इतिवत् सन्मार्गमेव परित्यज्य यत् सिद्धं तन्नैव बहुसाधितं भवति। अतः साधितं यत्तद् बहु वा स्वल्पं वा कथं भवतीति सूक्तिरियं ‘अदत्वा परसन्तापं...’ इत्येवं प्रकाशयति।

आत्मनोऽपेक्षया भिन्नः सर्वोऽपि ‘परः’। इत्युक्ते लोके विद्यमानाः सर्वे चराचरजन्तवोऽस्मिन्नर्थे पराः। तन्नाम अस्याः पृथिव्या उपरि आत्मनः सहजीविनः सर्वेऽपि परा एव। तेभ्यः सन्तापं, दुःखं वा किमपि न दत्वा यद्भवति तदेव ‘अकृत्वा परसन्तापं’ इत्यस्योद्दिष्टम्। येन कर्मणा अन्येषां शरीरस्योपरि वा मानसं प्रति वा दुःखं यत् परिणमेत् तन्न कृतमिति भावः। अन्येषां मनसि नष्टमित्यनुभूतिः, भीतिः, संशयोऽसूयापि वा उद्भवति चेत् तत्र परसन्तापः कृत इत्यवगन्तव्यम्। “अयि भोः! अयं पूर्वं यथासीत् न तथास्तीदानीम्।

तस्य चलनवलनादिकं सर्वमपि परिवर्तितम्। व्यक्ततया यत्क्रियते तस्याव्यक्तं किमपि कारणं भवति। गुप्तगुप्तमिव तस्य व्यवहारो दृश्यते। शक्यं यदयं स्वत एव मारकोऽस्ति अथवा मारकशक्तिभ्योऽतिसम्बद्धोऽस्ति। एतेन नैवास्माकं, देशस्य वा सुस्थितिः शक्या। स्वार्थसाधनपथे यत्किमपि अकार्यं कुर्यादेषः।" इत्यादयो भावाः परेषां मनसि अस्माकं कार्यवशादुत्पद्यन्ते चेत् परसंशयो दत्तोऽस्माभिरित्यवगन्तव्यम्।

खलमन्दिरमिति नीचस्य घातकस्य वा आश्रयमित्येतत्। दुर्जनानां सम्पर्को यदि भवति, तत् सुक्षेम्नि दूरे स्याच्चेत् (दुर्जनो दूरतो वन्द्यः इतिवत्) न कोऽपि दोषः। परन्तु धनकनकादिसमार्जने नीचस्य दास्यं न स्यात्। यत्र लोकसामान्यं अभिमानं मर्यादामपि हित्वा यत्तेनोक्तं तद्विना विचारेण करणीयम्; तस्य च कार्येण अन्येषां, समाजस्य च का हानिर्भवेदिति नायं मम विचारस्थानमिति कार्यशैली विवेकशून्यं दास्यं भवति। अगत्वा खलमन्दिरमित्यत्र विवेकशून्यं खलस्य दास्यं न कृत्वेत्याशयः।

वृत्तिमार्गे स्वकीयं, स्वपरिवारस्य च, स्वास्थ्यं अविगणय्य वा वृत्तिर्या क्रियते, वृत्तिर्या च पुनरग्रे पश्चात्तापकारिणी क्रियते, तया आत्मनः सन्ताप एव लाभो भवेत्। आत्मनः सन्तापेन विना यत् साध्यते तस्यास्मिन् श्लोके प्रशंसा वर्तते। उपर्युक्तैस्त्रिभिरपि अकार्यैः बहु साधितं भवेत्। धनकनकादिकं सुखसाधनानि च बहु प्राप्स्येरन्। परन्तु तत् सर्वमपि स्वल्पमेवेति मन्तव्यम् इति भावः। अन्यच्च त्रिभिरेतैर्विमुक्तं यत् सिद्ध्यति तदल्पमपि बह्वित्येव मन्तव्यम्। सत्यमेवेदं यत् येन अस्माकं सन्तृप्तिः समाधानं सार्थक्यभावः समुदेति तदेव बहु। बाह्ये प्रकारे यत्

समार्जितं विस्तृतं वैभवोपेतं च लक्ष्यते, अन्तश्च अतृप्त्याऽसमाधानेन पश्चात्तापेन च दह्यते तत् कथं वा बह्विति आद्रियेत?

प्रस्तुते एकविंशतितमे शतके देशेऽस्मिन् प्रवर्तमाना या वृत्तिदशा जीवनदृष्टिश्च वर्तते तस्यास्तोलनार्थं सूक्तिरियं अतीवप्रस्तुतेति मे मतिः।

भारतीया दृष्टिः सदापि जीवने ध्येयं तदधिगतिमार्गं च समानमानेन स्वीकरोति। अथवा मार्गं सदस्ति चेत् ध्येयं स्वत एव सद्रूपेण परिणमत इति धारणा भारतीया। राष्ट्रपितृगौरवं प्राप्तवान् महात्मा गान्धीमहोदयः सदा वदति स्म "साधनीयध्येयानामपेक्षया तदुपायमार्गाणि प्रधानतराणि (Means are more important than ends)" इति। स्वजीवितमेव एतदर्थे उदाहरणं स्थापितवान् सः। सत्यं ध्येयमहिंसा धर्मश्च मार्गमिति सदैव प्रबोधितवान् सः।

उपर्युक्ता सूक्तिर्वा गान्धीमहोदयस्य वाणी वा केवलं नीतिरिति वा सदाचार इति वा नाहं गृह्णामि। अवश्यमेवात्र व्यावहिरिकी दूरदृष्टिर्वर्तते। एषा दृष्टिर्वैज्ञानिकी इत्यपि स्वीकरणीयं भवति।

इदमिदानीं जनप्रीतिं प्राप्नुवन्तो नैके उद्योगप्रकाराः साधनावकाशाश्च विचारस्यास्य समर्थनाय उदाहरणरूपेण परीक्षितव्या भवन्ति। अद्यतनेषु विद्यार्थिषु उद्योगार्थिषु च अधिकं प्रस्तोष्यमाणोऽवकाशः तन्त्रांशविभागस्य (Software careers) भवति। अन्यत्र नूतनकृषिक्षेत्रे (Bio technology), उद्यमक्षेत्रे (Business Management) च एतादृशमाकर्षणं लक्ष्यते। वैद्यकीयक्षेत्रेऽपि एतदाकर्षणमन्यूनम्।

इदमत्र चिन्तनीयं यदेतदकार्षणं किं तत्तत्क्षेत्रे विद्यमानज्ञानस्यानुभवस्य

वा लोकसेवावकाशस्य वा कारणादुद्भूतमिति। तन्नैवेति स्पष्टम्। आकर्षणं तु पदव्या वा, मानसम्मानादीनां वा वृत्तिसौख्यस्य तद्गतसन्तुष्टेश्च कारणात् वा न्यूनं, तद्गतधनरूपवेतनकारणादधिकमिति स्फटिकवत् स्पष्टम्। यदन्यत्र वृत्तौ पूर्णे वयसि प्राप्येत तदत्र संवत्सरमात्र एव प्राप्येत चेत् आकर्षकस्यास्यावकाशस्य विपरिणामानां विषये किमर्थं व्यर्थं विचिन्तयेयम्? इति विचारधारा सामान्यायते। अस्तु। गतदशवर्षेभ्यः सम्पन्नस्यास्य औद्योगिकक्रान्तेः अपरं मुखं समाजे किमभवदिति चिन्तयामः। अधुना नगरेषु ग्रामेषु च जनानां अल्पतृप्तिः मितव्ययप्रवृत्तिश्च सावधानतया तिरोदधाना दृश्यते। सामान्यजनानां दैनन्दिनी जीविका अधिकव्ययवती जायमाना अस्ति। जीवनावश्यकानां मौल्यं लभ्यता च कठिनायते; अन्यत्र विलासवस्तूनां प्रचारः प्रसारश्च विद्युद्वेगेन प्रचलति। जनाश्च 'ऋणं कृत्वा घृतं पिबाम' इति धोरणामधिकं आश्रयन्तः सन्ति। प्रत्येकस्य कर्मणः, प्रत्येकस्याः सेवायाः धनरूपां कृतज्ञतां निरीक्षन्ते। कर्मकराः कृषकाश्च स्वकार्येषु हताशाः निष्ठाविहीनाः वृत्तित्यागे, ग्रामत्यागे, यदाकदापि प्राणत्यागेऽपि प्रवृत्ताः। नगरेषु पत्तनेषु च तृणतैलतण्डुलादिविक्रेतारः, अन्ये च विविधसेवासु निरताः ते इदमिदानीं 'तन्त्रांशोद्योगिनां' कृते 'अन्येषां' तिरस्कारेऽपि उद्युक्ता दृश्यन्ते । कार्यालयोद्योगिनः, शासकीयपटवः, लघुव्यवहार-निरताश्च इदानीं धनार्जनस्य शीघ्रोपायान् प्रशंसन्तो मार्गाद् भ्रष्टा भ्रंशमाणाश्च दरीदृश्यन्ते । समाजे दृश्यमाणस्य अस्य साक्षात् कारणं उपरितना औद्योगिकी क्रान्तिरिति नैव वक्तुं शक्यम्। परन्तु, साक्षरताधिक्यवशात्, माध्यमानां सम्पर्कसाधनानां च विस्तारविशेषवशात् देशे विद्यमानं आर्थिकं समतोलनं

असमतोलनं वा अत्यन्तं शीघ्रतया जनानां मनसि जागरणं कारयतीति सत्यम्। एतेन सर्वोऽपि धनदाहेन दह्यमानो अन्यत् सर्वं समीपस्थं दहतीत्यपि निश्चितम्। एवंरीत्या स्थिते "अदत्वा परसन्तापं...", "अगत्वा खलमन्दिरं ...", "अक्लेशयित्वा चात्मानं..." इत्यादिसुभाषितानि कालकवलीकृतानि भवेयुरिति निश्चितम्। सुभाषितानि जानन्तोऽपि अन्तिमं पादं "यद्बहु तदल्पम्!" इति परिवर्त्य कालमहिमान्विताः कालस्वरूपा एव भवेयुः।

अस्मिन् स्तरे सिंहावलोकनन्यायेन किञ्चित् परिवृत्य किमिदं जातम्? कुत्र वयं प्रस्थिताः? कुत्र च सम्प्राप्ताः? इत्येवं वयोवृद्धैर्ज्ञानवृद्धैर्नेतृभिः पितृभिरुद्योगार्थिभिर्विद्यार्थिभिरपि व्यष्टिरूपेण समष्टिरूपेण च चिन्तनीयं चिन्तास्पदं किमप्यस्तीति न भासते वा? उपायात् पूर्वमपायचिन्तनमुचितमिति शम्।

——x——

६. साधनचतुष्टयप्रकाशिका

— अपर्याप्तामृतः
संशोधकः,वैमान्तरिक्षविभागः,
भारतीयविज्ञानसंस्था

दृश्यशून्यं विभुं शान्तं ब्रह्मकल्पमकल्पकम्।
स्वयं विभातं चित्तं तन्नमस्कुर्मो यथाबलम्॥

साधनं मोक्षहेतुं यत्पूर्वबुद्धैः सुबोधितम्।
विवेकतः प्रवक्ष्यामि कृत्वा सद्गुरुवन्दनम्॥

अथ निःस्वभावानित्यासुखरूपस्य संसारस्य सहेतुकस्याविद्याया अत्यन्त-निवृत्तिरात्मज्ञानादेव। तस्यात्मज्ञाननिष्ठाहेतुकं साधनचतुष्टयं प्रदर्श्यते तत्त्वकाङ्क्षिणां हितार्थाय मच्चित्तशुद्धये च।

अत्र विगलितसर्वाविद्याकल्पितविकल्पैः शान्तमानसैर्मधुरस्वभावैर्निगमान्त-देशिकवरिष्ठैः शङ्करभगवत्पादैः साधनचतुष्टयं विना मोक्षकारणभूतस्वात्मविचारस्य सिद्धिर्न कथञ्चिद्भवतीति बोधितम्। तस्मात्सम्पादनीयमिदं साधनचतुष्टयं प्रयत्नतः मुमुक्षुभिः स्वात्मज्ञानलाभार्थम्। साधनचतुष्टयो नाम नित्यानित्यवस्तुविवेकश्च सर्वसुखस्पृहत्यागरूपविरागश्च शमदमादिषड्गुणसम्पत्तिश्च मोक्षैकेच्छा च।

आदौ नित्यानित्यविचारः। यद्देशकालवस्तुपरिच्छेदरहितं तन्नित्यम्। परिच्छेद-रहितत्वादेव नित्यस्याद्वयत्वं चानन्तत्वं सिद्ध्यति। अयं नित्यवस्तुर्ब्रह्मशब्देन श्रूयते वेदान्तानाम्। यद्ब्रह्मविलक्षणं तदनित्यम्। तस्मादनित्यवस्तवो देशतो वा कालतो वा वस्तुतो वा परिच्छिन्नाः। अत्रास्ति तत्र नास्तीति देशपरिच्छेदः।

तत्वत्कालपरिच्छेदः। अयमेको वस्तुरसावन्यद्वस्तुरिति पृथग्भावो वस्तुपरिच्छेदः। जातिभाववृद्धिपरिणामक्षयनाश इत्यनित्यवस्तूनां षड्विकारलक्षणश्च नामरूपनिमित्तत्वं च प्रसिद्धमेव। 'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा' इति न्यायादनित्यवस्तूनां निःस्वतन्त्रस्वभावत्वमवगम्यते। निःस्वभावत्वात्तेषां स्वाभाविकसत्ता निरस्यते। तस्मान्मिथ्यैव सर्वेऽनित्याः षड्विकारलक्षणाः नामरूपैर्परिच्छिन्नाः। अत्र सौगताः शूण्यवादिनः सर्वं मिथ्यैव न कश्चिन्नित्यवस्तुरस्तीति वदन्ति। तदसत्। याथात्म्यतत्त्वदर्शिनो वेदान्तिनः 'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्।' इति श्रुतिप्रमाणाच्च सदस्मीति स्वानुभवाच्च ब्रह्मणः सत्ता दर्शयन्ति। नित्यस्य ब्रह्मणः प्रत्यगात्माभिन्नत्वं 'अयमात्मा ब्रह्म' 'अहं ब्रह्मास्मि' इत्यादि महावाक्यैः श्रूयते। इदं सर्वं सूक्तं 'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इत्यभियुक्तवचनेन।

विशेषतस्त्वहङ्कारचित्तेन्द्रियदेहभौतिकसङ्घातादिभेदैरनेका अनित्याः। तत्र घटपटघरादि भौतिकसङ्घाताः प्रागुत्पत्तेश्च ध्वंसोत्तरकाले चाभावा एव। स्वपरदेहो विविधविचित्राश्चर्यस्त्रीपुरुषमृगपक्षिस्थावरादिभेदयुक्तोऽपि भौतिकसंहतत्वाद् अनित्यमेव। देहस्य च बालयौवनवृद्धादि विकाराश्च मरणान्तत्वं च लोकप्रसिद्धम्। तद्वच्चक्षुषादीन्द्रियविकारस्वभावोऽप्यवगम्यते। इष्टानिष्टविषयेन्द्रियसंयोगजन्याः सुखदुःखादयः संयोगकालानन्तरमभावं यान्ति। सङ्कल्पविकल्पनिश्चयस्मरणादिवृत्तिभेदैश्चित्तस्त्वनेकरूपोऽतिचपलस्वभावश्च। अहङ्कारस्तु जाग्रत्स्वप्नकालावहम् अस्मीति नित्यमिवावभासोऽपि न सुषुप्तिकालेऽस्त्यत एवाहङ्कारोऽप्यनित्यः। इत्यहङ्कारचित्तदेहबाह्यविषयादिसर्वज्ञेयवस्तूनामनित्यत्वं च ब्रह्मणो नित्यत्वं चेति

नित्यानित्यवस्तुविचारः।

नित्यानित्यविवेकाज्जन्यं ज्ञानं विषयसुखोपेक्षलक्षणं वैराग्यमिति संज्ञितम्। देहाद्यनित्यवस्तुसंयोगात्तन्निमित्तविषयभोगाद्दुःखमेवोद्भवति। इदं तु स्पष्टोक्तं भगवता वासुदेवेन

'ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः'॥

इति। तत्रैव 'अनित्यमसुखं लोकमिमं' 'दुःखालयमशाश्वतं' इति भगवद्वचनम्। अपि च श्रुतिः 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इत्यनित्यवस्तुषु न सुखलेशमप्यस्तीति बोधयति। 'किमर्था वयमध्येषामहे किमर्था वयं यक्ष्यामहे' 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' इत्यादि श्रुतिभ्यः केवलकर्मानुष्ठानाद्वा विषयभोगाद्वा न कथञ्चित्सुखस्पृहेभ्य उपरतिर्जायते इति अवगम्यते। मनोपरतिर्विना न जननमरणरूपदुःखमयसाराद्विमुक्तिर्भवति। तस्मात् 'अवश्यं यातारश्चिरतरमुषित्वापि विषयाः। वियोगे को भेदः' इति ज्ञात्वा विषयेन्द्रियसंयोगजं सुखमशेषतस्त्यक्तव्यं मुमुक्षुभिश्चिरकालमनुभूयोऽप्यनित्यम् एवेति विवेकेन। तत्रोपाधिभेदेन सुखं बहुविधं भवति। देहनिमित्तं सुखं पुत्रदारबन्धुमित्रादिसम्बन्धजन्यम्। बाह्यविषयसंस्पर्शजं स्मृतिरूपं ह्लादनमुदित-प्रेमादिरूपमन्तःकरणनिमित्तं सुखं। व्याकरणकाव्यनाटकालङ्कारतर्कगणितभौतिक-विज्ञानशास्त्रादिपठनाज्जनितसुखमप्यन्तःकरणनिमित्तमेव। 'श्रोत्रियस्य चाका-महतस्य' इति वेदान्तशास्त्राध्ययनाच्च निष्कामधर्मानुष्ठानाच्च यत्सुखं जायते तदपि बुद्धिनिमित्तमेव। वितर्कविचारानन्दास्मितारूपसम्प्रज्ञातसमाधिकालेऽनुभूयं समधिसुखम्। समाधिसुखं चित्तनिमित्तमपि शुद्धसत्त्वमयाच्चाबाह्यविषयनिमित्तत्वाच्च

विषयेन्द्रियसंस्पर्शजन्यदेहान्तःकरणनिमित्तसुखेभ्यो विलक्षणम्। इति देहान्तःकरण-समाधिनिमित्तभेदैरिहलोकसुखं व्यतिरिक्तं भवति। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यादि वेदवाक्यैश्च 'पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते। ते पुण्यमासाद्य सुरेन्द्रलोकानश्नन्ति दिव्यान्दिवि देवभोगान्' इत्यादि स्मृतिभ्यश्च वेदोक्तयज्ञादि-निर्दोषानुष्ठानेन यत्सुखं जन्मान्तरे स्वर्गादिलोके लब्धं तदपि 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यनित्यमेव। इति देहान्तःकरणसमाधिनिमित्तं च स्वर्गादिलोकनिमित्तं च सुखं विवेकेन त्यक्तव्यं मुमुक्षुभिरनित्यत्वात्।

विवेकयुक्तस्य वीतरागिणः स्वात्मविचारप्रतिबन्धकचित्तविक्षेपलयादिनिरोधार्थं समाधिविधिमथ वक्ष्यते।

'भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते'॥

इति भगवद्वचनमनुसृत्य पूर्वोक्तवदत्यन्तविषयसुखोपेक्षलक्षणवैराग्यं सम्पादनीयम्। 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मबुद्धिभिः' इति श्रुतेरपरोक्षतत्त्वज्ञानावबोधार्थं च 'रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति स्मृतेः परवैराग्यलाभार्थं च निरोधाभ्यासं कर्तव्यम्। मनसस्तत्त्वज्ञाने दृढस्थितिर्निरोधाभ्यासः। मन्निजस्वरूपो नित्यं मद्व्यतिरिक्तं सर्वमनित्यमिति तत्त्वज्ञानः। तद्धेतुकं चार्यैर्प्रकीर्तितं शमदमादि-षड्गुणसम्पत्तिः। शमदमोपरतितितिक्षासमाधानश्रद्धा इति षड्गुणाः।

भगवद्ध्यानवेदान्तश्रवणव्यतिरिक्तसर्वचित्तव्यवहारनिग्रहः शमः। ज्ञानैश्वर्य-वीर्यशक्तितेजबलसम्पन्नजगदुत्पत्तिस्थितिलयकारणभूतवात्सल्याद्यनन्तकल्याण-गुणगणयुक्तभक्तानुग्रहार्थगृहीतरामकृष्णनृसिंहाद्यनेकाश्चर्यनित्यप्रियदर्शनरूप-

श्रीवल्लभस्य सगुणब्रह्मणो हरेर्लीलामात्रात्यद्भुतचरित्रस्मरणदिव्यनामसङ्कीर्तन-दिव्यमङ्गलविग्रहाराधनादि सत्कार्येषु प्रवृत्तिरथवा तस्य विष्णोर्विश्वरूपस्य 'दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन' इतिवत् शङ्खचक्रकौस्तुभकस्तूरीतिलकालङ्कृतपीताम्बर-धृतलक्ष्मीसहितमन्दस्मितातिसौन्दर्यचतुर्भुजरूपस्य यशोदानन्दनस्य देवसिद्धयक्ष-किन्नरगन्धर्ववन्दितपादयुगलस्य तैलधारवदविच्छिन्नस्मरणं भगवद्ध्यानम्। ब्रह्माभिन्न-प्रत्यगात्मविषयात्मकश्रुतिस्मृतीनां विमर्शणं वेदान्तश्रवणः। ध्यानश्रवणादिव्यतिरिक्त-विषयध्यानाज्जननमरणरूपसंसृतिरेवोद्भवति। तदेव भगवान्नारायणः

'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति'॥

इत्यर्जुनायोपदिदेश।

रूपादिविषयेभ्यो चक्षुषादीन्द्रियनिग्रहो दम इति प्रकीर्तितः। चक्षुषेण रूपं दृष्ट्वा तद्रूपनिमित्तचित्तसन्तानविच्छित्तिश्चक्षुषनिग्रह इति विद्यते। तद्वत्स्पर्शगन्धशब्द-रसनिमित्तचित्तवृत्तिनिरोधस्त्वग्घ्राणश्रोत्रजिह्वेन्द्रियनिग्रह इत्यवगम्यते।

उपरतिर्नाम विषयेभ्यो मन्सोऽप्रयत्नतोऽन्तर्गमनः। अनात्मविस्मृतिपूर्वक-ब्रह्माभिन्नप्रत्यगात्मविषयचित्तव्यवस्थितिर्मनसोऽन्तर्गमनः। अत्रोपरतिशब्दार्थं सर्वकर्मसंन्यासमिति केचिद्वेदान्तिनो वदन्ति। अपरे तु काम्यनिषिद्धकर्मत्यागश्च फलाभिसन्धिरहितनित्यनैमित्तिककर्मानुष्ठानश्चोपरतिशब्दार्थः इति। उभयपक्षे तु काम्यनिषिद्धकर्मत्यागः समानः। संन्यासपक्षवादिनः 'परीक्ष्यलोकान्कर्मचितान् ब्राह्मणो निर्वेदमायन्नास्त्यकृतः कृतेन' 'न कर्मणा न प्रजया धनेन त्यागेनैके

अमृतत्त्वमानशुः' 'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इत्यादि श्रुतिभ्यः मोक्षस्य येन केन कर्मणाप्यसाध्यत्वं बोधयन्ति। अपि च 'यदहर्विरजेत्तदहर्प्रव्रजेत्' 'एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्ति' 'संन्यस्य श्रवणं कुर्यात्' इत्यादि श्रुतिभ्यश्च

'संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया।
प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः'॥

इत्यादिस्मृतिभ्यश्च मोक्षकारणभूतस्वात्मविचारस्याङ्गतया संन्यासं श्रुतिस्मृति-विहितमिति वदन्ति। तत्सत्यमेव। धर्मानुष्ठानपक्षवादिनः साधनचतुष्टयसम्पन्न एव संन्यासाधिकारिरिति वदन्ति। तस्मान्नात्र विरोधः किन्त्वभिप्रायभेद एव।

यथा 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः' इति भगवता पतञ्जलिना सूक्तं तद्वच्चिरकालप्रयत्नादेव निरोधाभ्यासस्य सिद्धिर्भवति। पूर्वोपार्जित-मोक्षप्रतिबन्धकलोकदेहशास्त्रवासनाबलात्। अभ्यासकाले चित्तैकाग्रता सिद्ध्यर्थं विक्षेपकारणशीतोष्णसुखदुःखज्वरादिसहनं तितिक्षा इति विद्यते।

'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तां तितिक्षस्व भारत'॥

इति च भगवद्वचनम्।

तत्त्वज्ञानसन्तानरूपस्मृतिः समाधानः। विशेषतश्चित्तदेहादिषु भ्रान्त्योदित-ममाहमित्यभिमानं त्यक्त्वा शुद्धे ब्रह्मणि निर्विशेषचैतन्ये मनसः स्थितिः समाधिः। तस्मिन्निरुद्धे चेतस्यभ्यासपरिपाकादसंप्रज्ञातसमाधिरुद्भवति। तदेव चित्तस्य परमस्थितिः।

'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्' ॥

इति श्रुतेः । भगवानपि

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्' ॥

इति समाधिविधिमुपदिदेश।

आचार्यश्रुतिवाक्येषु दृढविश्वासः श्रद्धा। केचिज्जीवेश्वरयोर्नित्यपृथक्त्वं दर्शयन्ति। अन्ये तु ईश्वरस्य शरीरं जीवः इति वदन्ति। इत्यत्र सन्तः जीवस्य च ब्रह्मणश्च स्वरूपं बहुविधेन कल्पयन्ति। तत्सर्वं चित्तविक्षेपकारणं त्यक्त्वा 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति सद्गुरूपदिष्टं ज्ञानमात्मब्रह्मैक्यलक्षणं स्वेतर-समस्तविलक्षणं श्रोतव्यं मन्तव्यं निदिध्यासितव्यं च निश्चलभक्त्या मुमुक्षुभिः। 'आचार्यवान्पुरुषो वेद' इति श्रुतेश्च 'श्रद्धावान्लभते ज्ञानं' इति स्मृतेश्च। इति शमदमादिषड्गुणनिर्णयः।

मोक्षेच्छां विना समाधिरपि न मोक्षकारणं भवति। कदाहमिदमविद्याकल्पित-घोररूपसंसारसागरं तरिष्यामीति तीव्रतापः मुमुक्षुत्वम्। 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज' इति सर्वकर्मसंन्यासपूर्वकाविच्छिन्नब्रह्मजिज्ञासा मुमुक्षुभिः कर्तव्यमिति भगवच्छासनम्।

सङ्ग्रहेनात्र शङ्करभगवत्पादाचार्याः

'वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते।।
तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः' ॥

इति साधनानां वैराग्यं च मुमुक्षुत्वं च मुख्यमिति च ते प्रयत्नतः सम्पादनीयं मुमुक्षुभिरिति बोधयन्ति।

इति प्रेमिकेन्द्रकृपापात्रेणापर्याप्तामृतेनकृता साधनचतुष्टयप्रकाशिका समाप्ता।

——x——

७. स्तोत्राणि

— वंशीकृष्णघनपाठी
अवधूतदत्तपीठम्, मैसूरु

दत्तगुरुस्तुतिः

यद्भूयिष्ठस्य नाम स्मृतिरपि कुरुते भस्मसात्पापराशिं
यत्प्रेष्ठप्रार्थनं प्राक् प्रजनयति परं पुण्यकर्मण्यपूर्वम्।
यद्राघिष्ठप्रबोधो भवजलधिमहो तारयेच्चिन्त्यमानः
तद्ब्रह्मिष्ठं प्रदीप्रं मम हृदयदरे भावये दत्तदेवम्॥ १॥

सन्दातृभ्योपि भूयान् मनसिजदलने यः पटीयस्त्वहेतोः
संयच्छद्भ्योपि भूया नगणितविभवप्रापकत्वान्नतानाम्।
संस्रष्टृभ्योपि भूयाञ्छ्रितधियि जनयन् ज्ञानवैराग्यभावं
तद्ब्रह्मिष्ठं प्रदीप्रं मम हृदयदरे भावये दत्तदेवम्॥ २॥

दत्तात्रेयं महर्षिं प्रथमगुरुपदं सच्चिदानन्दपूर्णम्
एशाब्रह्मात्मकं प्राणितसकलजनं तत्त्वबोधामृतैस्स्वैः।
यद्देवेनुग्रहीतर्यधिगतविभवा निर्जरास्तापसाश्च
त्रैगुण्यातीतमूर्तिं तमखिलभुवनाधीश्वरं नौमि नित्यम्॥ ३॥

द्वादशादित्यस्तुतिः

मित्राय तुभ्यं रवये च सूर्य - भान्वात्मकायापि खगाय पूष्णे।
हिरण्यगर्भाय मरीचये च आदित्यनाम्नेपि सवित्र ऋग्भिः॥ १॥

अकार्यकुर्वे नमसां सहस्रं आरोग्यमीप्सन्निह भास्कराय।
श्रीसच्चिदानन्दकरो विवस्वानुन्मूलयेद्देहमनश्शुचो मे॥ २॥

——x——

८. विवाहः

(आशुगद्यरचनाप्रतियोगितायां लब्धप्राथम्यं गद्यम्)[2]

— एस्. अनन्तशयनः
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुनगरम्

"अनादिदम्पती वन्दे सीतारामावुमेश्वरौ।
धर्मार्धस्य कथां वच्मि विवाहहतभागिनः"॥

आसीत्कश्चन विंशतिवर्षीयः अधितार्धधर्मशास्त्रः, पुराणेषु श्रुतानेकविवाहकथः, विवाहाय कन्यापेक्षी च धर्मार्धो नाम युवकः। पुराणेतिहासेषु सीताराम-शकुन्तलादुश्यन्त-अम्बिकाविचित्रवीर्य-शर्मिष्ठाययातिप्रमुखानां विवाहकथाः श्रुत्वा, ज्ञात्वा च धर्मशास्त्रे विवाहभेदान्, तेष्वन्यतरविवाहः शीघ्रं मयाऽपि करणीयः इति समचिन्तयत्। धर्मशास्त्रे हि -

"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः"॥

इतीमं श्लोकं पश्यति। आलोचयति चैवम् - "अष्टौ विवाहभेदाः राराजन्ते धर्मशास्त्रग्रन्थेषु। तेषु च दैवस्तु नापेक्षितः। मम प्रयत्न एव नास्ति तत्र। ब्राह्मस्त्वाद्यः रोचते मह्यम्। परन्तु तत्रापि मम प्रयत्नः नास्ति। न साध्यः जन्मन्यस्मिन् मम। यतः -

"आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।
आहूय दानं कन्यायाः ब्राह्मोधर्मः प्रकीर्तितः"॥

---

[2]निर्णेतृभिः उपरिष्टं गद्यं व्याकरणौचित्यदृष्ट्या तत्र तत्र परिष्कृत्य प्रकाशितम्।

इति निबबन्धधर्मशास्त्रज्ञतल्लजः। नाहं श्रुतिशीलवान्। भवेयं तथा यदि श्रुतिर्नामसखी मे स्यात्। एतादृशे मह्यं को वा कन्यापिता आच्छादितार्चितकोमलललनां दद्यात्? नायं मद्योगो विवाहः। आर्षम्... अहह नाहं मर्षयामि।

अहो चतुर्थोऽपि कण्टक एव मे।

"सहोभौ चरतां धर्मं इति वाचानुभाव्य च।
कन्याप्रदानमभ्यर्थ्य प्राजापत्यविधिः स्मृतः"॥

इति खलु तुरीयः। परन्तु "विवाहः धर्माचरणाय" इति अरसिकवाग्गलितं वाक्यम्। नाहमभिलषामि तम्। धार्मिकाः कथं रसिकाः स्युः, ये पेलवां स्त्रियमपि धर्माचरणादिक्लेशाय नियुञ्जते। अहो, अङ्गनाङ्गोपाङ्गालिङ्गनजन्यपरमानन्दपरित्यागिनस्ते रसिकाः इति ये ब्रुवन्ति ते नाम जगत्यत्यरसिकाः वि-राजन्ते (विकारेण)। धिग्धार्मिकान्। नमो ललनाधरामृतास्वादितरसिकेभ्यः।

इत्यालोचयन् भीतः पुरेवमालोचयति। अहो! अष्टसु भेदेषु भिन्नाः चत्वारः। भीतिर्मां बाधते यत् अविवाहित एव भवामीति। अहह, चिन्तनमेव हृन्मर्मच्छेदि। यदीदमेव सत्यं स्यात् तर्हि जीवन्नपि मृत एवाहम्। भवतु अवशिष्टेषु चतुर्षु अन्यतरं कुर्वे एव। किम्? कोऽयं पञ्चमः? गान्धर्वो वा। रोचते मह्यम्। यतो हि -

"इच्छायान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वस्सतु विज्ञेयः मैथुनः कामसम्भवः"॥

एतादृशगान्धर्वविवाहः शकुन्तलादुश्यन्तयोः भारते पठितमिति मन्ये। किं तद्भारतम्, वर्णनारहितम् । ललनाद्वेषि। प्रकृतिपेलवां शकुन्तलामेव रागिणीं इति वदति। परित्यज्यतां तत् (केवलं अस्य दुष्टस्य चिन्तनमिदम्)। गृह्यतां

तद्यत्र सुमधुरश्शृङ्गारः प्रनृत्यति कालिदासकृतशाकुन्तले। सत्यं अरसिकानामपि रसिकतोद्बोधकम्। "अरसिकेषु रसिकत्वनिवेदनं शिरसि मा लिख" इति न व्यथते कालिदासशाकुन्तलास्वादकः। अरसिकमपि रसिकं करोति श्रवनमात्रेण शाकुन्तलम्।

एवमेवालोचयन् श्लोकार्धं सार्थकं पठति -"इच्छया अन्योन्यसंयोगः कन्यायाश्च वरस्य च" इति। त्रस्तः पुनः रोदिति, प्रलपति च। अहं खलु इच्छावान्, न संशीतिः। इच्छावतीं कुत्रान्विषामि? अहं खलु किञ्चित्सुन्दरः। अतिकुरूपः। सुन्दरीं लषते मनः। सुन्दरी इच्छेद्वा माम्? अन्विषामि मत्समानां मदभिलषितां नितम्बिनीम्। "स्यात्सा जगतीतले यत्र कुत्रापि। प्रयत्नः खलु कर्तव्यः" इत्यालोचयन् निखिलभुवनतलगृहान्तस्स्थितकोमलयुवतीमनःप्रसादनाय कृतभूरिपरिश्रामोऽपि न कस्याश्चित् मनः एनं अपेक्षितम्। वर्षमेकं त्यक्तसर्वकार्यभारोऽयं ललनैककामुकः न सफलो बभूव। परिश्रान्तः, कृद्धश्चायं स्वनयने परिपातयति षष्ठे विभागे यः -

"ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चेव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते"॥

इति।

"भवतु यः कोऽपि विवाहः। आसुरो वा भासुरो वा। परन्तु आसुराय धनमपेक्षितम्। अहं खलु दरिद्रः। किं करणीयम्? कन्यापेक्षिता चेत् तदर्थं किमपि करणीयम्। अश्लीकं आत्मानं न चिन्तयामि।" इत्यालोच्य कन्यायै धनापेक्षी जातः। धनाय चोरश्च जातः। अपरस्मिन् संवत्सरे स्तेय-द्यूतादिना सम्पादितधनकनकादिमान् बभूव। तदा विचचार - "धनिकः खल्विदानीमहम्।

यस्यास्ति वित्तं स च दर्शनीयः कुलीनः खलु। अहमपीदानीं वित्तवानतः कुलीनो दर्शनीयश्च।"

विचार्येत्थं धनापेक्षिणं कन्यापितरं पश्यति कदाचन। तत्तनयां पश्यति नितम्बचुम्बिवेणीं, कर्णायतमोचनारविन्दां, सुभ्रुवं, सुमध्यमां, कुचोन्नतां, क्वणन्नूपुरचरणपल्लवां सकलसौन्दर्यसारभूतां क्षीरक्षालितहस्तस्पर्शनीयाम्। तत्पित्रे तस्यै च यथेच्छं द्रविणं दत्वा उवाहैनां रूपवतीम्। अन्ततः षष्ठे एव स्वकामनापूर्तिसन्तोषेण आस्फोटितवान् धर्मांधः। तस्मिन् दिने रजनी रञ्जनी भूयादिति स्वयमेव इच्छन् रात्रीं प्रतीक्षमाणः ननन्द। रजनी प्राप्ता एव। स्वगृहे शय्यागारे मञ्जुमञ्चे उपविश्य, यच्छृणोति तस्याः नूपुरशब्द इव श्रूयते। तस्याः कण्ठादागतमधुरध्वनिमिव शृणोति। "रजनी गच्छन्ती वर्तते। रञ्जनी कदाऽऽयाति? क्षीरचषकहस्ता सुकोमला कदाऽऽयाति? कुतो नायाति" इतित् बहिरागत्य स्वप्नलोकात् पश्यति न कश्चन गृहे। पिता सुता च अपलायताम्। मूर्छितः, मुहूर्तानन्तरं दीर्घोच्छ्वासेन उत्थाय, दुःखितः उच्चैः रोदिति। "अहो! अभिलषितविवाहः सञ्जातः। यत्प्रकृष्टाभिलषितं अङ्गनालिङ्गनजन्यसुखं न प्राप्तम्" इति पुनः पुनः रुरोद।

सप्तमः तं दृष्ट्वा हसन् आह्वयामास। तं पश्यति। तत्रासीत् -

"हृत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्।
आकृष्य कन्यावरणं राक्षसो धर्म उच्यते"॥

इति।

प्रागेव सन्तप्तहृदयः, वज्रादपि कठोरः सञ्जातः। "अनुभवितव्यं अनुभवितव्यं सुखम्" इत्याक्रुष्य उन्मत्तः इव बभूव।

बलात्कन्यामेकां आनीय, तां भर्त्सितवान्। परन्तु जनाः तज्ज्ञात्वा तं सन्ताड्य, तैः सः ग्रामात् निष्कासितः।

ग्रामान्तरे उन्मत्तं अष्टमः अधमः पैशाचः स्वयमेव प्राप्तवान्। तत्स्वरूपमवदत्तस्मै।

"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः"॥

इति।

अहमधमोऽपि आनन्ददायीत्यवदत्। अङ्गीचकार च सः। सत्यमेवमेव कार्यमिति क्रियोन्मुखो जातः। कुत्रचित् सुप्तामिति मत्वा उन्मत्तः मृतां जगाम।

ज्ञात्वा च तत् विनष्टबुद्धिः विनष्टप्राणश्च बभूव। अहो कामुकानां रागिणां स्थानम्।

"तस्मात्सर्वैर्विरागेण भवितव्यं सदैव हि।
दैवदत्तं समासाद्य नन्देयुः सर्वसज्जनाः"॥

(वस्तुतः विवाहः कन्यायाः। उद्वाहश्च पुंसः। तथापि व्यवहारं आदृत्य लिखितम्।)

——x——

९. समुद्रः

(आशुपद्यरचनाप्रतियोगितायां लब्धप्राथम्यं पद्यम्)[3]

— एस्. अनन्तशयनः
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरुनगरम्

शयानं मुकुन्दं पयोधौ लसन्तम्
ममाज्ञानतामिस्रसूर्यं महान्तम्।
श्रिया सेव्यमानं सदा मन्दहासम्
फणीशासनं तं नमामीष्टदैवम्॥ १॥

समुद्रपारदृश्वानः स्रष्टारस्तत्तलस्य च।
नाहमन्यतरस्तस्मात् प्रयतेऽब्धिं निरीक्षितुम्॥ २॥

ये महान्तः सुशोभन्ते गम्भीरा गुणशालिनः।
उपमाविषयं तेषां समुद्रं वर्णयाम्यहम्॥ ३॥

आम्नाये पुरुषस्य नेत्रयुगलं यस्मात्समुज्जृम्भितम्
विष्णुर्यस्य जले विभाति यशसा वेलासु सीतापतिः।
ख्याताख्यातमणीन् बिभर्ति जठरे नैकानहो तादृशम्
शब्दैः कैर्ननु वर्णयामि सरितामीशं रमेशालयम्॥ ४॥

श्रीमन्तमनुगच्छन्ति दरिद्राश्चञ्चलाः सदा।
वाहिन्यः खलु गच्छन्ति रत्नाकरमनुत्तमम्॥ ५॥

मानवानां याचनेन भीतो नारायणः किल।
लक्ष्म्यार्णवान्तरं यातः नागच्छेरन् नरा इति॥ ६॥

[3]निर्णेतृभिः उपरिष्टानि पद्यानि छन्दोव्याकरणौचित्यदृष्ट्या तत्र तत्र परिष्कृत्य प्रकाशितानि।

लोकापराधानवलोक्य तेभ्यः
मा मा जनाः! मा कुरुतापराधम्।
इत्थं समुत्थाय करान् समुद्रो
वक्तीव मे भाति समीक्ष्य वीचीः॥७॥

रत्नाकरोऽगाधरूपं नरभीत्या हि लब्धवान्।
अन्यथा नामसार्थक्यं न स्यात्तस्य कलौ युगे॥८॥

दर्पं नृपाणामयमेक एव
गम्भीरभावेन भिनत्ति नूनम्।
लज्जावतीनां मदमारकोऽयम्
लावण्यभावेन तथा समुद्रः॥९॥

सुताभिवृद्धिं परिवीक्ष्य माता
यथा परानन्दमुपैति तद्वत्।
पयोधिमाता खलु पूर्णिमायां
चन्द्रोदयानन्दभरा विभाति॥१०॥

गाम्भीर्यवानप्ययमम्बुराशिः
कारुण्यपूर्णोऽस्ति न संशयोऽत्र।
घोरं महेन्द्रस्य हि पापभागम्
जग्राह सन्तोषधियाऽविचार्य॥११॥

आसाद्य धीराः कनकादि वित्तम्
नैवातिनन्दन्ति निगीर्णचित्ताः।
तथा नदीसङ्गमनेन नैव
महार्णवो नन्दति युक्तचेताः॥१२॥

मदः कदाचिन्महतामपि स्यात्
दृष्टान्त एतस्य महार्णवो हि।
रामाय लङ्कागमनोत्सुकाय
मदं क्षणं दर्शितवान् समुद्रः ॥ १३ ॥

लोकोपकारी ननु सागरोऽसौ
पुराणसिद्धा प्रथिता कथास्ति।
स्वान्ते सुघोरं वडवानलं तम्
प्रपञ्चसन्तापभिया बिभर्ति ॥ १४ ॥

इत्थमत्र वडवानलगर्भम्
चन्द्रसूर्यमणिसूतिमतुल्यम्।
ईशदत्तसुधिया परिवर्ण्य
श्रीमतेऽर्पणमिहाशु करोमि ॥ १५ ॥

दशास्य हन्ता रघुनाथ एव
गीतोपदेष्टा नवनीतचोरः।
विश्वस्य पाता शिव एव नूनम्
रत्नाकरो सागर एव नान्यः ॥ १६ ॥

——x——

१०. संस्कृते कवनेच्छुकस्य अवश्यपाठ्यानि

— संस्कृतसङ्घः

कोशाः

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
१. अमरकोषः	भानोजीदीक्षितव्याख्यासहितः	चौखम्बा
	विदुषः रङ्गनाथशर्मणः कन्नडव्याख्यासहितः	काव्यालयः
	(तेलुगु भाषायाम्) ताळ्ळपाक-तिरुवेङ्कटार्यस्य गुरुबालप्रबोधिका-व्याख्यासहितः	जयलक्ष्मी
२. बृहद्धातुकुसुमाकरः	पं. हरेकान्त मिश्रः (सिद्दान्तकौमुदीस्थितानां सर्वाणां धातूनां रूपाणि)	चौखम्बा
३. आङ्ग्ल-संस्कृतशब्दकोशः	वामन-शिवराम-आप्टे	मोतीलाल्
४. संस्कृत-आङ्ग्लशब्दकोशः	वामन-शिवराम-आप्टे	मोतीलाल्
५. बृहद्धातुरूपावलिः	श्री टी. आर्. कृष्णाचार्यः	शृङ्गेरी

स्तोत्राणि

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
१. शिवानन्दलहरी	शङ्कराचार्यः	मोतीलाल्
२. सौन्दर्यलहरी	शङ्कराचार्यः	मोतीलाल्
३. दयाशतकम्	वेदान्तदेशिकः	चौखम्बा
४. पादुकासहस्रम्	वेदान्तदेशिकः	चौखम्बा
५. पञ्चशती	मूककविः	सद्विद्या
६. श्रीकृष्णकर्णामृतम्	लीलाशुकः	जीवनः
७. पञ्चलहरी	जगन्नाथपण्डितः	चौखम्बा

पद्यगद्यखण्डकाव्यानि प्रबन्धाः नाटकानि शास्त्रग्रन्थाश्च

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
१. भामिनीविलासः	जगन्नाथपण्डितः	चौखम्बा
२. मेघदूतम्	कालिदासः	चौखम्बा
३. कुमारसम्भवम्	कालिदासः (मल्लिनाथव्याख्या)	चौखम्बा
४. रघुवंशः	कालिदासः (मल्लिनाथव्याख्या)	चौखम्बा
५. कादम्बरी (कथामुखम्)	बाणभट्टः	चौखम्बा
६. कादम्बरी (महाश्वेतावृत्तान्तः)	बाणभट्टः	चौखम्बा
७. कादम्बरी (शुकनासोपदेशः)	बाणभट्टः	चौखम्बा
८. हर्षचरितम्	बाणभट्टः (काणे-व्याख्या)	मोतीलाल्
अनुवर्तते...		

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
९. पञ्चतन्त्रम्	विष्णुशर्मा	चौखम्बा
१०. भोजप्रबन्धः	बल्लालसेनः	चौखम्बा
११. वेतालपञ्चविंशतिः	जम्भलः	चौखम्बा
१२. स्वप्ननाटकम् (स्वप्नवासवदत्तम्)	भासः	चौखम्बा
१३. ऊरुभङ्गम्	भासः	चौखम्बा
१४. कर्णभारम्	भासः	चौखम्बा
१५. दूतवाक्यम्	भासः	चौखम्बा
१६. दूतघटोत्कचम्	भासः	चौखम्बा
१७. पञ्चरात्रम्	भासः	चौखम्बा
१८. प्रतिमानाटकम्	भासः	चौखम्बा
१९. प्रतिज्ञानाटकम् (प्रतिज्ञायौगन्धरायणम्)	भासः	चौखम्बा
२०. अविमारकम्	भासः	चौखम्बा
२१. भासनाटकचक्रम्	महाकवेः भासस्य सम्पूर्णनाटकसङ्कलनम्	चौखम्बा
२२. मालविकाग्निमित्रम्	कालिदासः	चौखम्बा
२३. विक्रमोर्वशीयम्	कालिदासः	चौखम्बा
२४. अभिज्ञानशाकुन्तलम्	कालिदासः	चौखम्बा
२५. मृच्छकटिकम्	शूद्रकः	चौखम्बा
अनुवर्तते...		

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
२६. मुद्राराक्षसम्	विशाखदत्तः	चौखम्बा
२७. उत्तररामचरितम्	भवभूतिः	चौखम्बा
२८. मालतीमाधवम्	भवभूतिः	चौखम्बा
२९. वेणीसंहारम्	भट्टनारायणः	चौखम्बा
३०. नागानन्दम्	श्रीहर्षः	चौखम्बा
३१. रत्नावली	श्रीहर्षः	चौखम्बा
३२. भगवदज्जुकम्	बोधायनः	निर्णयसागरः
३३. मत्तविलासम्	महेन्द्रवर्मा	नागः
३४. लटकमेलकम्	शङ्करधरः	चौखम्बा
३५. चतुर्भाणी	वररुचिः ईश्वरदत्तः श्यामिलकः शूद्रकश्च	
३६. कुवलयानन्दः	अप्पय्यदीक्षितः	चौखम्बा
३७. ध्वन्यालोकः	आनन्दवर्धनः	मोतीलाल्
३८. वक्रोक्तिजीवितः	कुन्तकः	चौखम्बा
३९. काव्यप्रकाशः	मम्मटः	चौखम्बा
४०. साहित्यदर्पणः	विश्वनाथः	चौखम्बा
४१. सुभाषितत्रिशती (शतकत्रयम्)	भर्तृहरिः	चौखम्बा
४२. शिशुपालवधम्	माघः (मल्लिनाथव्याख्या)	चौखम्बा
अनुवर्तते...		

पुस्तकम्	रचयिता (व्याख्या)	प्रकाशकः
४३. किरातार्जुनीयम्	भारविः (मल्लिनाथव्याख्या)	चौखम्बा
४४. वृत्तरत्नाकरः	भट्टकेदारः	चौखम्बा
४५. दशकुमारचरितम्	दण्डी (पूर्वपीठिका)	चौखम्बा
४६. चम्पूरामायणम्	भोजराजः	चौखम्बा

प्रकाशकाः

संज्ञा	प्रकाशकः
चौखम्बा	चौखम्बा संस्कृतप्रतिष्ठानम्, देहलीनगरम् दूरवाणी - ०११-२३८५६३९१;४१५३०९०२
काव्यालयः	काव्यालयः, मैसूरुनगरम्
जयलक्ष्मी	श्री जयलक्ष्मी पब्लिकेषन्स्, हैदराबाद् दूरवाणी - ०४०-२३०५०९८६
शृङ्गेरी	श्रीशङ्कर-अद्वैतशोधकेन्द्रम्, श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी - ५७७ १३९
मोतीलाल्	मोतीलाल् बनारसीदास्, दूरवाणी - ०११-२५७९५१८०;२५७९३४२३;२५७९२७३४
निर्णयसागरः	निर्णयसागरमुद्रणालयः
नागः	नाग्-पब्लिषर्स्, देहली
सद्विद्या	सद्विद्याप्रकाशन्, बनशङ्करी
जीवनः	जीवनकार्यालयः,बेङ्गलूरुनगरम्

——x——

संस्कृतसङ्घस्य वार्षिकनिवेदिका (२००७-०८)

संस्कृतसङ्घस्य नूतनकार्यनिर्वाहकवर्गव्यवस्था २००५ तमे वर्षे डिसेम्बर् मासे अभवत्। उत्तेजपूरितानां कार्यकर्तॄणां आगमनेन प्राप्तद्विगुणीकृतोत्साहेनामुना सङ्घेन गते वर्षद्वये (२००६ तथा च २००७), अस्मिन्नपि वर्षे (२००८) नैके कार्यक्रमाः समायोजिताः।

१. गुरुपूर्णिमाचरणम् — जूलै २००७ मासे ३० तमे दिनाङ्के "गुरुपूर्णिमा-महोत्सवः" आयोजितः। तस्मिन् सन्दर्भे सस्कृतसङ्घस्य अध्यक्षः भारतीयविज्ञानसंस्थायाः गणनविज्ञानविभागस्य विश्रान्तप्राचार्यः डा. वी. वी. एस्. शर्मामहोदयः सम्मानितः। सभाकार्यक्रमस्य अध्यक्षः आसीत् विद्युत्सम्पर्कविभागप्राचार्यः डा. नारायणदत्तमहोदयः। सन्मानकार्यक्रमानन्तरं संस्कृसङ्घसदस्यस्य साकेतनाथस्य पत्नी श्रीमती शिरीषा निजवीणावादनेन श्रोतॄनरञ्जयत्।

२. संस्कृतसम्भाषणशिबिरम् — बेङ्गलूरुनगरे स्थिता 'संस्कृतभारती' संस्था भारतीयविज्ञानसंस्थायां अक्टोबर् २००७ मासे संस्कृतसम्भाषणशिबिरम् अचालयत्। संस्कृतसेविका पूर्णप्रज्ञाशालायाः संस्कृताध्यापिका श्रीमती

शोभा शिबिरे शिक्षिका आसीत्। संस्कृतसम्भाषणे सुलभतां, सरलतां च अनुभूतवन्तः सर्वे विद्यार्थिनः।

३. "चित्रकाव्यपरिचयः" भाषणसरणिः — अवधानिना डा. शङ्करमहोदयेन "चित्रकाव्यपरिचयः" इति नाम्ना भाषणसरणिः अक्टोबर् २००७ मासस्य १३ तमदिनाङ्कादारब्धा। प्रथमे भाषणे काव्यविशेषावगमनोपयोगिछन्दसः सोदाहरणं विशदीकृताः। चित्रकाव्यस्य कानिचन विशिष्टोदाहरणान्यपि दर्शितानि। तस्मिन्नेव मासे २७ तमे दिनाङ्के सम्पन्ने द्वितीये भाषणे चित्रकाव्यस्य केचन प्रभेदाः निरूपिताः। द्वयोरपि भाषणयोः चित्रीकरणं कृतम्। एषा भाषणसरणिः वत्सरेऽस्मिन् अग्रे अनुवर्तते।

४. संस्कृतगद्यपद्यकाव्यरचनास्पर्धा — मार्च् २००८ मासे २३ तमे दिनाङ्के संस्कृते कवनेच्छुकानां प्रोत्साहोद्देशेन संस्कृतगद्यपद्यकाव्यरचनाप्रतियोगिता समायोजिता। बेङ्गलूरुनगरवासिनामेव उद्दिष्टायां अस्यां स्पर्धायां पूर्णप्रज्ञविद्यापीठ-उत्तरादिमठ-वेदविज्ञानगुरुकुल-भारतीयविज्ञानसंस्थाभ्यः उदीयमनकविवतंसाः भागग्रहीतारः आसन्। समुद्रविवाहौ क्रमेण पद्यगद्यरचनावस्तुनी। पूर्णप्रज्ञविद्यापीठछात्रः एस्. अनन्तशयनः गद्यपद्यरचनयोः लब्धप्राथम्यः

रराज। वेदविज्ञानगुरुकुलविद्यार्थी स्वरूपशर्मा, पूर्णप्रज्ञविद्यापीठछात्रः मातरिश्वा च क्रमेण गद्यपद्ययोः प्रशस्तिमप्राप्नुताम्।

५. वाग्गेयकार–आराधनम् — मार्च् २००८ मासे ३० तमे दिनाङ्के वाग्गेयकाराणां आराधनम् आचरितम्। प्रातः काले नववादनसमये साम्प्रदायिकसङ्कीर्तनयात्रया आरब्धा स्वरझरी रात्रौ नववादनपर्यन्तं सर्वान् पूतान् कृतवती। प्रातः काले पूजाकार्यक्रमानन्तरं 'सुनादप्रिय' सङ्गीतनिवहेन, भारतीयविज्ञानसंस्थायाः विद्यार्थिभिस्सह घनरागपञ्चरत्न-कृतीनां गोष्ठिगानं प्रचलितम्। अनन्तरं वाग्गेयकार-आराधनं अन्वर्थनाम कारयितुं आयोजिते 'वाग्गेयकाररसनामृतम्' कार्यक्रमे 'नादोपासन'-सङ्कीर्तनसङ्घेन विभिन्नवाग्गेयकारविरचितकृतीनां गोष्ठिगानं सुसम्पन्नम् आसीत्। तत्पश्चात् संस्थायाः विद्यार्थी, औत्तरेयकर्णाटशास्त्रीयसङ्गीत-विद्वान् दीपकपरमशिवमहोदयः कर्णाटशास्त्रीयसङ्गीतमूर्तित्रयविरचित-कृतिभ्यः जनरञ्जकं व्याख्यानं अददात्। सायङ्काले पञ्चवादनपर्यन्तं नैकाः सङ्गीतज्ञाः विद्यार्थिनः, विद्यार्थिन्यश्च कर्णाटक, हिन्दुस्थानीय साम्प्रदायावनुसृत्य निजगानवाद्यैः स्वरार्चनमकुर्वत। षड्वादनसमये सतीश-धावन्-सभाङ्गणे आयोजितया सङ्गीतकलानिधेः पद्मश्रीबिरुदाङ्कितस्य

डा. एन्. रमणीमहोदयस्य मुरलीनिनदामृतधारया आराधनकार्यक्रमः समाप्तः। डा. रमणीमहोदयस्य सङ्गीतकार्यक्रमे धनुर्वीणावाद्यसहकाराय विद्वान् एच्. के. वेङ्कटराममहोदयः, मृदङ्गवाद्यसहकाराय विद्वान् सी. चेलुवराजुमहोदयः, मोर्सिङ्गाद्यसहकाराय विद्वान् श्रीरङ्गं-कण्णन्-महोदयश्च उपस्थिताः आसन्।

६. संस्कृतरङ्गभूमिपरिचयः – नाट्यशास्त्रानुसारं संस्कृतरूपकप्रयोगः — एप्रिल् २००८ मासे १३ तमे दिनाङ्के सतीशधावन् सभाङ्गणे शतावधानिना डा. रा. गणेशमहोदयेन "संस्कृतरङ्गभूमिपरिचयः - नाट्यशास्त्रानुसारं संस्कृतरूपकप्रयोगः" इति विषयमधिकृत्य भाषणम् सुसम्पन्नम्। संस्कृत-गद्यपद्यकाव्यरचनाप्रतियोगितायां भागग्रहीत्रेभ्यः युवकविभ्यः तस्मिन्नेव सन्दर्भे पारितोषिक-प्रमाणपत्राणि प्रदत्तानि। संस्कृतसङ्घस्य वार्षिकपत्रिकायाः "संस्कृतिः"-इत्यस्याः २००८ वर्षसञ्चिका विद्वद्भिः तस्यायामेव सभायां लोकार्पिता।

——x——